श्रीमदानन्दतीर्थभगवत्पादाचार्यप्रणीतः

तन्त्रसारसङ्ग्रहः

श्रीवेदवेद्यशिष्यकृतटीकासंवलितः

संशोधकः

सि. आर्. प्रदीपसिंहः

पूर्णप्रज्ञविद्यापीठम्

प्रकाशनम्

शम्याप्रासप्रकाशनम्

गुरुसार्वभौमनगरम्, बेङ्गळूरु-६१.

श्रीमदानन्दतीर्थभगवत्पादाचार्यप्रणीतः

तन्त्रसारसङ्ग्रहः

श्रीवेदवेद्यशिष्यकृतटीकासंवलितः

संशोधकः

सि. आर्. प्रदीपसिंहः

पूर्णप्रज्ञविद्यापीठम्

प्रकाशनम्

शम्याप्रासप्रकाशनम्

गुरुसार्वभौमनगरम्, बेङ्गळूरु-६१.

ಶ್ರೀಮದಾನಂದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಪ್ರಣೀತಃ

ತಂತ್ರಸಾರಸಂಗ್ರಹಃ

ವೇದವೇದ್ಯಶಿಷ್ಯಕೃತಟೀಕಾಸಂವಿಲಿತಃ

ಪ್ರಕಾಶಕರು

ಶಮ್ಯಾಪ್ರಾಸ ಪ್ರಕಾಶನ

೩೨, "ಶಮ್ಯಾಪ್ರಾಸ"
೪ನೇ ಮುಖ್ಯ ರಸ್ತೆ, ಚಿಕ್ಕಕಲ್ಲಸಂದ್ರ, ಗುರುಸಾರ್ವಭೌಮನಗರ,
ಬೆಂಗಳೂರು-೬೧.

ಪ್ರಥಮ ಮುದ್ರಣ - ಫೆಬ್ರವರಿ ೨೦೦೦

ಮುದ್ರಿತ ಪ್ರತಿಗಳು - ೧೦೦೦
ಬೆಲೆ-ರೂ. ೧೫/-

ಮುದ್ರಣ :
ಸುರಭಿ ಗ್ರಾಫಿಕ್ಸ್
ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು.



अनुग्रहसन्देशः

तन्त्रसारसङ्ग्रहः श्रीमदाचार्यरचिता अपूर्वतमा कृतिः । कल्पवृक्षवत् सकलाभीष्टप्रदायको ग्रन्थवर इति त्रिविक्रमाचार्याः मुक्तकण्ठमिमं ग्रन्थं श्लाघितवन्तः । देवालयोपयुक्ते आगमशास्त्रे, शिल्पशास्त्रे च श्रीमदाचार्याणां अनुपमपाण्डित्यस्य निदर्शनभूतः अयं ग्रन्थः, भगवदाराधनजपादिप्रकारप्रदर्शनेन सज्जनानां सात्विक सदाचारशीलजीवनस्य सर्वदा मार्गदर्शनं करोति ।

अस्माकं प्रियशिष्यः प्रदीपसिंहः प्राचीनसरलसंग्राहकटिप्पण्या साकं इमं ग्रन्थं सम्पाद्य स्वीयसुधामङ्गलमहोत्सवसन्दर्भे प्रकाशितवानिति नितरां सन्तुष्यामः । श्रीमदाचार्याः एनं समनुगृह्णन्तु इत्याशास्महे ।

इति सप्रेम नारायणस्मरणानि

श्रीविश्वेशतीर्थश्रीपादाः

पर्याय श्रीपेजावर अधोक्षजमठः

जगद्गुरु श्रीमध्वाचार्यसंस्थानम्

रजतपीठपुरम्

ಆಶೀರ್ವಚನ

ಗುರುಕುಲಾಭ್ಯಾಸ ಮುಗಿಸಿ ಹೊರಗೆ ಬರುತ್ತಿರುವಂತೆಯೇ, ತಾ ಕಲಿತ ವಿದ್ಯೆಯನ್ನೇ ಸಮಾಜಕ್ಕೆ ಧಾರೆಯೆರೆಯುವ ಸಂಕೇತವಾಗಿ ಆಚಾರ್ಯರ ಮೇರುಕೃತಿಯಾದ ತಂತ್ರಸಾರ ಗ್ರಂಥವನ್ನು ವ್ಯಾಖ್ಯಾನ ಸಹಿತವಾಗಿ ಪ್ರಕಟಪಡಿಸುವ ಸಾಹಸವನ್ನು ಮಾಡುತ್ತಿರುವ ಪ್ರದೀಪಸಿಂಹ ಆಚಾರ್ಯರನ್ನು ನಾವು ಮನಃಪೂರ್ವಕ ಅಭಿನಂದಿಸುತ್ತೇವೆ. ಹರಿಗುರುಗಳು ಇವರಿಂದ ಇನ್ನೂ ಹೆಚ್ಚಿನ ಜ್ಞಾನಕಾರ್ಯವನ್ನು ನಿರಂತರ ನಡೆಸುತ್ತಿರಲೆಂದು ಉಪಾಸ್ಯಮೂರ್ತಿಯನ್ನು ಪ್ರಾರ್ಥಿಸುತ್ತೇವೆ.

ಇಂತು ಸಪ್ರೇಮ

ನಾರಾಯಣ ಸ್ಮರಣೆಗಳು

ಶ್ರೀ ವಿಶ್ವಪ್ರಸನ್ನತೀರ್ಥಸ್ವಾಮೀಜಿ

ಶ್ರೀ ಪೇಜಾವರ ಅಧೋಕ್ಷಜ ಮಠ

ಜಗದ್ಗುರು ಮಧ್ವಾಚಾರ್ಯ ಸಂಸ್ಥಾನ,

ಉಡುಪಿ.

॥ ಶ್ರೀರಾಮವಿಠಲೌ ವಿಜಯೇತೇ ॥

ಮುನ್ನುಡಿ

ಶ್ರೀ ಶ್ರೀಮದಾನಂದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯರ ಅಪೂರ್ವ ಕೊಡುಗೆಗಳಲ್ಲಿ ತಂತ್ರ ಶಾಸ್ತ್ರದ ಮೇಲೆ ಬೆಳಕು ಚೆಲ್ಲುವ ಕೃತಿ-ಶ್ರೀಮತ್ತಂತ್ರಸಾರಸಂಗ್ರಹ ಶ್ರೀಮದಾಚಾರ್ಯರೇ ಹೇಳಿದಂತೆ 'ब्रह्मणे कथितात्(೪-೧೬೨)' ಬ್ರಹ್ಮದೇವರಿಗೆ ಭಗವಂತನು ಉಪದೇಶಿಸಿದ ಮೂಲ ತಂತ್ರಸಾರ ಗ್ರಂಥದಿಂದ ಅವಶ್ಯಾಚರಣೀಯ ಕರ್ಮಾಚರಣೆಯನ್ನು ಅನ್ಯೂನಾನತಿರಿಕ್ತವಾಗಿ ಸಂಗ್ರಹಿಸಿದ ಅಪೂರ್ವ ಕೃತಿ ಇದು. ಈ ಕೃತಿಯ ಅನೇಕ ವ್ಯಾಖ್ಯಾನಗಳಲ್ಲಿ ಶ್ರೀವಾದಿರಾಜರ ಪ್ರಶಿಷ್ಯರಿಂದ ರಚಿತವಾದ ಟೀಕಾ 'ಶ್ರೀತಂತ್ರಸಾರ ವಿವೃತಿ'. ತತ್ವಕಣಿಕಾ-ಛಲಾರೀ ವ್ಯಾಖ್ಯಾನಗಳಂತೆ ಪ್ರೌಢವಲ್ಲದ ಬಾಲಕಸುಬೋಧವಾಗಿರುವ ಅನ್ವರ್ಥಕ ಟೀಕಾಗ್ರಂಥ. ಇದರಲ್ಲಿನ ಕೆಲವು ವಿಶೇಷಾಂಶಗಳೆಂದರೆ- ಮಾತೃಕಾಪ್ರತಿಪಾದ್ಯದೇವತಾ ವಿವರಣೆಯಲ್ಲಿ ಪ್ರಚಲಿತವಾದ 'ऋष' 'ऌजि' ಶಬ್ದಗಳ ಸ್ಥಾನದಲ್ಲಿ'ऋक्ष' 'ऌजिर' ಶಬ್ದಗಳ ಉಲ್ಲೇಖ. ಕೇಶವಾದಿ ಚತುರ್ವಿಂಶತಿಮೂರ್ತಿಗಳ ಲಕ್ಷಣವನ್ನು ವಿಶೇಷರೀತಿಯಲ್ಲಿ ಸಂಗ್ರಹಿಸಿರುವುದು. ತತ್ವನ್ಯಾಸದಲ್ಲಿ ಗೃಹಸ್ಥರಿಗೆ ಸ್ಥಿತಿನ್ಯಾಸವಿದೆ ಎಂಬ ವಿಚಾರ, (ಛಲಾರೀ ಟೀಕಾದಲ್ಲಿ ಸ್ಥಿತಿನ್ಯಾಸವಿಲ್ಲವೆಂಬ ಅಭಿಪ್ರಾಯವಿದೆ.) ಆರು ತೆರನಾದ ಸರಸ್ವತೀಭಾರತೀಮಂತ್ರೋದ್ಧಾರ ಇತ್ಯಾದಿ, ಹಾಗೂ ಅನೇಕ ಸ್ಥಳದಲ್ಲಿ ಭಿನ್ನ-ಭಿನ್ನ ಸಂಪ್ರದಾಯಗಳ ಉದಾಹರಣೆ.

ಪ್ರಕೃತ ಈ ಗ್ರಂಥಸಂಶೋಧನೆಯನ್ನು ಮಾಡುವಾಗ ಮೂರು ಹಸ್ತಲಿಖಿತ ಗ್ರಂಥಗಳನ್ನು ಉಪಯೋಗಿಸಲಾಗಿದೆ. ಎರಡು ಹಸ್ತಪ್ರತಿಗಳು ನನ್ನ ಸಂಗ್ರಹದಲ್ಲಿ (ಶಮ್ಯಾಪ್ರಾಸ ಗ್ರಂಥಾಲಯ ಎಮ್.ಎಸ್. ಸಂ. ೨೫೧, ೨೫೨) ಇರುವುದು. ಮತ್ತೊಂದು ಹಸ್ತಪ್ರತಿಯನ್ನು ಕೊಟ್ಟವರು ಶ್ರೀಯುತ ಬಿದರಹಳ್ಳಿ ಅನಂತಾಚಾರ್ಯರು. ಇವರಿಗೆ ತುಂಬಾ ಆಭಾರಿಯಾಗಿದ್ದೇನೆ. ಈ ಮೂರು ಪ್ರತಿಗಳಲ್ಲಿ ಲೇಖಕಪ್ರಮಾದವಶಾತ್ ಮಧ್ಯೆ ಮಧ್ಯೆ ಗ್ರಂಥಪಾತವಾಗಿದೆ. ಹೀಗಾಗಿ ಈ ಮೂರೂ ಪ್ರತಿಗಳನ್ನು ಸೇರಿಸಿ ಈ ಕೃತಿಯ ಸಂಪಾದನೆಯಾಗಿದೆ. ಈ ಮೂರರಲ್ಲಿ ಎಲ್ಲಿಯೂ ಸಹ ಕೃತಿಕಾರರ ಹೆಸರು ಉಲ್ಲಿಖಿತವಾಗಿಲ್ಲ. ಆದರೆ ಗ್ರಂಥಾರಂಭದಲ್ಲಿ ಶ್ರೀವಾದಿರಾಜರಿಗೆ ಹಾಗೂ ಅವರ ಶಿಷ್ಯರಾದ ವೇದವೇದ್ಯರಿಗೆ ಮಾತ್ರ ನಮಸ್ಕಾರ ಮಾಡಿರುವುದರಿಂದ, ''ವೇದವೇದ್ಯಶಿಷ್ಯಕೃತಟೀಕಾ ಗ್ರಂಥವಿದೆ'' ಎಂಬ ಮಾಹಿತಿಯಿಂದ ಈ ಕೃತಿಕಾರರು ವೇದವೇದ್ಯರ ಶಿಷ್ಯರೇ ಎಂದು ತೀರ್ಮಾನ ಮಾಡಲಾಗಿದೆ. ಕೆ.ಟಿ. ಪಾಂಡುರಂಗಿಯವರೂ ಸಹ ಇದೇ ಅಭಿಪ್ರಾಯವನ್ನು ಕೊಟ್ಟಿದ್ದಾರೆ. ಈ ಕೃತಿಯಲ್ಲಿ ಪ್ರಚಲಿತ ಮೂಲ ಪಾಠಕ್ಕೂ ಟೀಕಾಪಾಠಕ್ಕೂ ಬಹಳ ವ್ಯತ್ಯಾಸವಿದೆ. ಆದ್ದರಿಂದ ಟೀಕಾಸಮ್ಮತವಾದ ಪಾಠವನ್ನು ಮೂಲಪಾಠವನ್ನಾಗಿ ಗ್ರಹಣಮಾಡಿ ಪ್ರಚಲಿತ ಪಾಠವನ್ನು ಪಾಠಾಂತರವನ್ನಾಗಿಸಿ ಕೊಡಲಾಗಿದೆ.

ಪ್ರಮಾದವಶಾತ್ ಸಂಭವಿಸಿರಬಹುದಾದ ದೋಷಗಳು- ನನ್ನವು. ಈ ಗ್ರಂಥ ಸಂಪಾದನೆಯನ್ನು ಸಹ न वैदुष्यभ्रान्त्या न च वचनचातुर्यकुधिया न मात्सर्यावेशान्न च

चपलतादोषवशतः । परं श्रद्धाजाड्यादकृपि कृतिमाचार्यवचसि स्खलन्नप्येतस्माज्जगति नहि निन्द्योऽस्मि विदुषाम् ಎಂಬ ಆರ್ಯೋಕ್ತಿಯಂತೆ ಶ್ರೀಮದಾಚಾರ್ಯರಲ್ಲಿನ ಭಕ್ತಿಜಾಡ್ಯದಿಂದ ಮಾಡಿದ್ದೇನೆ. ಈ ಕಾರ್ಯದಿಂದ ಬಂದ ಶುಭಫಲವೆಲ್ಲವೂ ಸಹ ''शुभान् ध्यायन्ति ये कामान् गुरुदेवप्रसादजान् । इतरानात्मपापोत्थान् तेषां विद्या फलिष्यति'' ಎಂಬ ಆಚಾರ್ಯರ ವಚನದಂತೆ ತಮ್ಮ ನಿರಂತರ ಸಂಚಾರದಲ್ಲಿಯೂ ಎರಡು ವರ್ಷಗಳ ಕಾಲ ಶ್ರೀಮನ್ನ್ಯಾಯಸುಧಾದಿ ಆಧ್ಯಾತ್ಮಿಕವಿದ್ಯೆಯನ್ನು ಶಿಷ್ಯವಾತ್ಸಲ್ಯದಿಂದ ಉಪದೇಶಿಸಿದ ನಾಲ್ಕನೆಯ ಬಾರಿ ಶ್ರೀಕೃಷ್ಣಪರ್ಯಾಯ ಪೀಠಾಧಿರೂಢರಾದ ಪರಮಪೂಜ್ಯ ಶ್ರೀ ೧೦೦೮ ಶ್ರೀ ವಿಶ್ವೇಶತೀರ್ಥಶ್ರೀಪಾದಂಗಳವರಿಗೆ ಸಲ್ಲತಕ್ಕದ್ದು. ಹಾಗೂ ನನಗೆ ಆಧ್ಯಾತ್ಮಿಕವಿದ್ಯೆಗೆ ಸಾಧನವಾದ ಈ ದೇಹವನ್ನು ನೀಡಿ ಸಕಾಲದಲ್ಲಿ ಸಕಲಸಂಸ್ಕಾರಗಳನ್ನು ಮಾಡಿ ನನ್ನನ್ನು ಬೆಳೆಸಿದ ನನ್ನ ಪೂಜ್ಯ ಮಾತಾಪಿತೃಗಳಿಗೆ ಸಲ್ಲತಕ್ಕದ್ದು.

ಈ ಗ್ರಂಥವನ್ನು ನನ್ನ ಶ್ರೀಮದನುವ್ಯಾಖ್ಯಾನ-ನ್ಯಾಯಸುಧಾ ಮಂಗಳಮಹೋತ್ಸವದಲ್ಲಿ ಪರಮಪೂಜ್ಯಗುರುನಿಯಾಮಕಭಾರತೀರಮಣ ಶ್ರೀಮುಖ್ಯಪ್ರಾಣಾಂತರ್ಗತ ಮಧ್ವಪತಿಶ್ರೀರಾಮವಿಠಲಾಭಿನ್ನ ಶ್ರೀಅಂಬೃಣೀವೇದವ್ಯಾಸದೇವರಲ್ಲಿ ಸಮರ್ಪಣೆ ಮಾಡುತ್ತಿದ್ದೇನೆ.

ಪ್ರಮಾಥಿ ಸಂವತ್ಸರ
ಮಾಘ ಶುದ್ಧ ದಶಮಿ
ಭೌಮವಾಸರ-೧೫-೨-೨೦೦೦

ಸಜ್ಜನವಿಧೇಯ
ಸಿ.ಆರ್. ಪ್ರದೀಪಸಿಂಹ

ಕೃತಜ್ಞತೆಗಳು

ಈ ಗ್ರಂಥಕ್ಕೆ ಶಿಷ್ಯವಾತ್ಸಲ್ಯದಿಂದ ಮುನ್ನುಡಿಯನ್ನು ಬರೆದುಕೊಟ್ಟ ಪರಮಪೂಜ್ಯ ಶ್ರೀವಿಶ್ವೇಶತೀರ್ಥಶ್ರೀಪಾದಂಗಳವರಿಗೆ ಹಾಗೂ ನನಗೆ ಯಜುಃ, ಸಾಮ, ಅಥರ್ವವೇದ ಹಾಗೂ ವೇದಾಂತಗ್ರಂಥಗಳನ್ನು ಉಪದೇಶಿಸಿದ ಪರಮಪೂಜ್ಯ ಶ್ರೀವಿಶ್ವಪ್ರಸನ್ನತೀರ್ಥರಿಗೆ ಶಿರಸಾಷ್ಟಾಂಗ ನಮನಗಳು.

ಪೂರ್ಣಪ್ರಜ್ಞ ವಿದ್ಯಾಪೀಠದಲ್ಲಿ ಹನ್ನೊಂದು ವರ್ಷಗಳ ಕಾಲ ಪಾಠ ಹೇಳಿ, ಈ ಸ್ಥಿತಿಗೆ ತಂದಂತಹ ನನ್ನ ಸಕಲ ಗುರುಗಳಿಗೆ ಹಾಗೂ ನನ್ನ ವಿದ್ಯಾಭ್ಯಾಸಕ್ಕೆ ಅಕ್ಕರೆಯಿಂದ ವಿಶೇಷ ಗಮನ ತೋರಿಸಿದ ಡಿ.ಪ್ರಹ್ಲಾದಾಚಾರ್ಯರಿಗೆ ಕೃತಜ್ಞತಾಪೂರ್ವಕ ನಮಸ್ಕಾರಗಳು.

ಹಾಗೂ ಈ ಗ್ರಂಥದ ಕರಡಚ್ಚನ್ನು ಆಮೂಲಾಗ್ರವಾಗಿ ನೋಡಿ, ತಿದ್ದಿ, ಕರಡಚ್ಚನ್ನು ಓರಣ ಮಾಡಿಕೊಟ್ಟಂತಹ ಪೂಜ್ಯಪಿತೃಪಾದರಾದ ರಘುನಂದನಾಚಾರ್ಯರಿಗೆ ನಮನಗಳು.

ಹಾಗೂ ಅನೇಕ ಹಸ್ತಪ್ರತಿಗಳನ್ನು ಕೊಟ್ಟಿರುವಂತಹ ಆತ್ಮೀಯ ಮಿತ್ರ ಬಿ.ಎನ್.ವಿಜಯೀಂದ್ರನಿಗೆ, ಕರಡಚ್ಚನ್ನು ಸಕಾಲಕ್ಕೆ ಮಾಡಿಕೊಟ್ಟಿರುವಂತಹ ಡಿ.ವಿ.ಪ್ರಹ್ಲಾದ್ ಅವರಿಗೆ, ಸುಂದರವಾದ ಮುಖಪುಟದೊಂದಿಗೆ ಸಕಾಲದಲ್ಲಿ ಮುದ್ರಣ ಮಾಡಿಕೊಟ್ಟ ಶ್ರೀನಾಥ್ ಪ್ರಿಂಟರ್ಸ್‌ನ ಶ್ರೀನಾಥ್ ಅವರಿಗೆ ಹಾಗೂ ಅನೇಕ ರೀತಿಯಿಂದ ಪ್ರಕಾಶನಕ್ಕೆ ಸಹಕರಿಸಿದ ಸಕಲ ಸಹಾಯಕರಿಗೆ

ಇವರೆಲ್ಲರಿಗೂ ಹಾರ್ದಿಕ ಧನ್ಯವಾದಗಳು.
ಸಿ.ಆರ್. ಪ್ರದೀಪಸಿಂಹ

|| श्रीः ||

|| श्रीवेदव्यासाय नमः ||

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

तन्त्रसारसङ्ग्रहः

|| प्रथमोऽध्यायः ||

जयत्यब्जभवेशेन्द्रवन्दितः कमलापतिः ।
अनन्तविभवानन्दशक्तिज्ञानादिसद्गुणः || १ ||

वेदवेद्यशिष्यकृतश्रीमत्तन्त्रसारसङ्ग्रहटीका

श्रीमत्तन्त्रसारविवृतिः

निरवधिगुणसिन्धुं सज्जनैकान्तबन्धुं स्मृतिहतभवबन्धं श्रीपतिं सत्यबन्धम् ।
सजलजलदकायं नित्यनिर्धूतमायं सकलसुरसहायं कृष्णमाराधयामि || १ ||

आनन्दतीर्थमुनिमादरतः प्रणम्य
श्रीवादिराजयतिमन्वथ वेदवेद्यम् ।
[1]सत्सम्प्रदायमविहाय विचार्य शास्त्रं
सत्तन्त्रसारविवृतिं सरलां लिखामि || २ ||

अथ सकलसज्जनहितार्थं आनन्दतीर्थमुनिः [2]तन्त्रसारसङ्ग्रहं चिकीर्षुः निरन्तरायोऽपि शिष्यशिक्षायै श्रीहरेरुत्कर्षनिरूपणरूपं [3]कृतमङ्गलं निबध्नाति ।। जयतीति ।।। कमलायाः श्रियः पतिः जयति उत्कृष्टो वर्तते । उत्कृष्टार्थजयतेरकर्मकत्वात् । [4]जयेर्जयाभिभवयोराद्येऽर्थेऽसावकर्मकः इत्युक्तत्वात् । उत्कर्षहेतुत्वेन विशेषणद्वयमाह । अब्जभवेन्द्रवन्दित इति । अब्जभवो ब्रह्मा ईशो रुद्रः इन्द्रः पुरन्दरः । अब्जभवश्च ईशश्च इन्द्रश्च अब्जभवेशेन्द्राः तैः वन्दितः स्तुतो नतश्च । वदि अभिवादनस्तुत्योरिति

१.व्यासाभिधानसुहृदो विनियोजनेन । २. तन्त्रसारग्रन्थं । ३. आदौ इत्यधिकः पाठः, कृतेति नास्ति ।
४. मायावादखण्डनटीकायां ।

[1]धातुव्याख्यानात् । अभ्यर्हितत्वात् [2]अब्जभवपदस्य पूर्वनिपातः । अनन्तविभवानन्दशक्तिज्ञानादिसद्गुणः । अनन्ताः अपरिच्छिन्नाः विभवः ऐश्वर्यं आनन्दः सुखं शक्तिः सामर्थ्यं ज्ञानं च आदिर्येषान्ते। सन्तो निर्दोषाः गुणाः शौर्यधैर्यबल भक्तवात्सल्यादयो यस्य स तथा ॥ १ ॥

विधिं विधाय सर्गादौ तेन पृष्टोऽब्जलोचनः ।
आह देवो रमोत्सङ्गविलसत्पादपल्लवः ॥ २ ॥

अथ श्रीतन्त्रसारस्य प्रामाण्यमुपपादयितुं वक्तृश्रोत्रोरुत्कर्षमाह। विधिं विधायेति । सर्गादौ सृष्टेरारम्भे विधिं ब्रह्माणं विधाय स्वनाभिकमलादुत्पाद्य देवः क्रीडाद्यनेकगुणः श्रीविष्णुः आह । ब्रह्माणमुपदिदेश । किम्भूतः तेन ब्रह्मणा पृष्टः । तन्त्रसारमिति शेषः। पृच्छतेर्द्विकर्मकत्वात् । पुनः किम्भूतः रमोत्सङ्गविलसत्पादपल्लवः । रमायाः उत्सङ्गे विलसन्तौ पादपल्लवौ यस्य स तथा । एवं सुखस्थितः सन् आत्मसम्भवं विधिमाह इति न विप्रलम्भादिशङ्कावकाशः ॥ २ ॥

अहमेकोऽखिलगुणो वाचकः प्रणवो मम ।
अकाराद्यतिशान्तान्तः सोऽयमष्टाक्षरो मतः ॥ ३ ॥

किमाह । अहमिति । अखिलाः पूर्णाः अनन्ताः गुणाः यस्य स तथा। एवम्भूतः एकः केवलोऽहं । न ह्यन्यः । एके मुख्यान्यकेवला इत्यमरः । प्रणवो मम वाचकः । अनन्तगुणत्वाभिधायकः । सोऽयमकाराद्यतिशान्तान्तः । अकारः आदौ अतिशान्तो अन्ते यस्य स तथा । अकारोकारमकार बिन्दुनादघोषशान्तातिशान्तभेदेन अष्टाक्षरो मतः ज्ञातः प्रसिद्धः इति ॥ ३ ॥

स विश्वतैजसप्राज्ञतुरीयात्मान्तरात्मनाम् ।
परमात्मज्ञानात्मयुजां मद्रूपाणां च वाचकः ॥ ४ ॥

[3]प्रणवाक्षरवाच्यदेवानाह। स इति। क्रमेणाकारादिभिः विश्वादिज्ञानात्मान्तमद्रूपाणां च वाचकः । न केवलं ममैव मद्रूपाणां चेति च शब्दार्थः ॥ ४ ॥

---

१. धातोः। २. पदेति नास्ति। ३. प्रणवाक्षरदेवता आह।

तद्रूपभेदाः पंचाशन्मूर्तयो मम चापराः ।
पञ्चाशद्वर्णवाच्यास्ता वर्णास्तारार्णभेदिताः ॥ ५ ॥

प्रणवाक्षरेभ्यः तथैव ताभ्यश्च पञ्चाशद्वर्णानां तद्देवतानां चाभिव्यक्तिमाह । तद्रूपेति । मम अपराः अजाद्याः पञ्चाशन्मूर्तयः तद्रूपभेदाः तेषां अष्टाक्षरदेवानां विश्वादीनां [1]रूपभेदाः । परिशेषात् तेभ्योऽभिव्यक्ता इत्यर्थः । पञ्चाशद्वर्णैः क्रमेण वाच्याः पञ्चाशद्वर्णाः तारस्य प्रणवस्य वर्णैः भेदिताः तेभ्योऽभिव्यक्ताः ॥ ५ ॥

द्विरष्टपंचकचतुःपंचेत्येवाष्टवर्गगाः ।
अज आनन्द इन्द्रेशावुग्र ऊर्ज ऋतम्भरः ॥ ६ ॥

कथमित्यत आह । द्विरष्टेति । द्विरष्टभिः षोढशस्वरैः एको वर्गः स्पर्शैः चवर्गपंचकम् । अन्तस्थैश्चतुर्भिः एकः । ऊष्मभिर्ळकारसहितैः पञ्चभिः एकः इत्येवाष्टौ वर्गाः । प्रणवाष्टाक्षरेभ्योऽभिव्यक्ताः वर्णाश्च । पञ्चाशन्मूर्तीराह । अज [2]इत्यादिना । न जायत इत्यजः । आनन्दरूपत्वादानन्दः । इन्दति सर्वस्येष्टमिति इन्द्रः । इदि परमैश्वर्य इति धातोः । ईश्वरत्वादीशः । ईः लक्ष्मीः तस्येशो वा । उग्रः नृसिंहरूपेण । महाप्रलये उं रुद्रं ग्रसतीति वा उग्रः । बलवत्वात् जीवकत्वाच्च ऊर्जः । ऊर्ज बलप्राणयोरिति धातोः । ऋतं सत्यं बिभर्तीति ऋतम्भरः ॥ ६ ॥

ॠघलृशौ लॄजिरैकात्मैर ओजोभृदौरसः ।
अन्तोऽर्धगर्भः कपिलः खपतिर्गरुडासनः ॥ ७ ॥

ॠद्धः सकलाभिः शक्तिभिरिति । केचित् ॠघ इति पठन्ति । तत्र इयर्ति सर्वं वा जानातीति जिघर्ति दीप्यते चेति ॠघः । ॠ गतौ घृ क्षरणदीप्त्योरिति धातुद्वयजः । लृशः लाति इयर्तिष्यतीति लृशः । ला आदाने ऋ गतौ शो तनुकरणे इति धातुत्रयात् । लॄजिरः । लाति ऋच्छति जयति रमयति स सर्वमिति । एकात्मा । एको मुख्यः क्षराक्षराभ्यामन्यो वा आत्मा एकात्मा एके मख्यान्यकेवला इति कोशात् । ऐरः आसर्वतः प्रेरकत्वादैरः । ईर प्रेरणे । ओजः सामर्थ्यं बिभर्तीति ओजोभृत् । औरसः । सर्वजीवानां उरसि हृदि वसतीति औरसः । अन्तं करोतीत्यन्तः । अर्धगर्भः ।ऋध्यतीत्यर्धो अपरिच्छन्नो गर्भो यस्य स तथा । वटपत्रे शयानस्य श्वासपथेन गर्भं प्रविष्टो मार्कण्डेयो

१. स्वरूपविशेषाः । २. अज इति ।

शतपरिवत्सरं परिभ्रमन् नान्तं जगामेति महाभारतकथा । सर्वजीवेषु गुणै ऋद्धतया अर्धः ब्रह्मा । स गर्भे यस्येति वा । कपिलः वर्णात् । अथवा कपीन् [1]हनूमत्सुग्रीवप्रभृतीन् आत्मीयतया लात्यादत्त इति कपिलः । खपतिः खस्याकाशस्य पूर्णसुखस्य वा पतिः । नभो ददाति इव सतां मार्गं यन्नियमाददः इति भागवते । गरुडासनः । गरुडः आसनं यस्य स तथा ॥ ७ ॥

घर्मो ङसारश्चार्वङ्गश्छन्दोगम्यो जनार्दनः ।
झाटितारिर्ञमष्टङ्की ठकलो डरको ढरी ॥ ८ ॥

तेजोरूपत्वात् घर्मः । घृ क्षरणदीप्त्योरिति धातोः । ङसारः । सर्वसारत्वात् सर्ववर्णवाच्यत्वाच्च ङस्यापि सारः । चारूणि कन्दर्पकोटिलावण्योपेतानि अङ्गानि यस्येति चार्वङ्गः । छन्दोभिः श्रुतिभिः गम्यते ज्ञायत इति छन्दोगम्यः । वेदा ह्येवैनं वेदयन्तीति श्रुतेः । जनान् जीवान् अर्दयति संसारयतीति जनार्दनः । जनैः सद्भिः अद्यते याच्यते वा इति वा जनार्दनः । अर्द गतौ याचने चेति धातोः । झाटिताः विद्राविताः अरयो येन इति झाटितारिः । यमयतीति यमः । पृषोदरादित्वात् यस्य ञः । टङ्की । पाषाणदारणमायुधं टङ्कं तद्वान् । ठकलः । ठः शून्यः कलाभिः षोडशकलात्मकशरीरेण । ठः शून्ये च बृहद्धात्रौ इति कोशात् । डरकः । हंसरूपेण डयनात् । रमणात् सुखरूपत्वाच्च डरकः । ढरी । ढर क्षरणे । ढरयति क्षरयति प्रलये सर्वमिति ढरी ॥ ८ ॥

णात्मा तारस्थभो दण्डी धन्वी नम्यः परः फली ।
बली भगो मनुर्यज्ञो रामो लक्ष्मीपतिर्वरः ॥ ९ ॥

सर्वात्मकत्वेन णस्थाप्यात्मा । तारकत्वात् प्रणवरूपत्वात् तारः । थभः स्थिरकान्तिः ।दण्डयति शिक्षयति देवानिति दण्डी । दण्डो यष्टिः गोचारणादिविहारे यस्येति वा । यत्याश्रमधारणाद्वा दण्डी । प्रशस्तं प्रसन्नं शार्ङ्गाख्यं धनुर्यस्येति धन्वी । नम्यः ब्रह्मादिभिर्वन्द्यः । परः पालकः पूरकः उत्कृष्टः क्षराक्षरविलक्षणो वा । पॄ पालनपूरणयोरिति धातोः । फली सकलकर्मफलप्रदः । बली अनन्तबलः । स वै बलं बलिनां चापरेषामिति भागवते । भगः ऐश्वर्यादिरूपः । ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणेति वैष्णवे । ज्ञानरूपत्वान्मनुः ।

---

१. हनूमदादीन् । २. पा-ठलको । ३. सूर्यकोटितोऽप्यधिकलावण्योपेतानि । ४. डम्भरूपेण डयनात् ।

यज्ञः इज्यते पूज्यते सर्वैरिति यज्ञः । रमयति सुखयति देवादीनिति रामः । लक्ष्मीपतिः । सर्वैः वृयत इति वरः ॥ ९ ॥

शान्तसंवित् षड्गुणश्च सारात्मा हंसळाळुकौ ।
पञ्चाशन्मूर्तयस्त्वेता ममाकारादिलक्षकाः ॥ १० ॥

शान्ता सुखरूपा संवित् ज्ञानं यस्य स शान्तसंवित् । षड्गुणः ऐश्वर्यादिषड्गुणरूपः । सारः उत्कृष्टचिदानन्दात्मक आत्मा देहो यस्य सः सारात्मा । हन्ति जनानिति वा सर्वमिति वा हंसः । ळाळुकः । लल विलासे । लीलाविलासवत्त्वात् ळाळुकः । एषां साधुत्वं च पृषोदरादित्वात् उणादिप्रत्ययैश्च समर्थनीयम् । विस्तरभयान्नेह प्रपञ्चितम् । एताः मम पञ्चाशन्मूर्तयः अजाद्याः अकारादिलक्षकाः । अकारादयो लक्षकाः धारकत्वाच्च वाचकाः यासां ता अकारादिदेवता इत्यर्थः । क्षस्य एकपञ्चाशन्मध्यस्थस्य तु नृसिंहदेवता नृसिंहस्तस्य देवता इत्यनेनैव लक्ष्यते[1] ॥ १० ॥

नारायणाष्टाक्षरश्च ताराष्टाक्षरभेदवान् ।
आद्यैस्तारचतुर्वर्णैर्भिन्ना व्याहृतयः क्रमात् ॥ ११ ॥

नारायणाष्टाक्षरस्य प्रणवाष्टाक्षरेभ्योऽभिव्यक्तिमाह । नारायणाष्टाक्षरश्चेति । व्याहृतीनामभिव्यक्तिमाह । आद्यैरिति । अकाराद्यैः तारस्य प्रणवस्य चतुर्भिर्वर्णैः अकारोकारमकारबिन्दुभिः व्यस्तसमस्ताश्च तिस्रो व्याहृतयो भिन्नाः अभिव्यक्ताः ॥ ११ ॥

अनिरुद्धादिकास्तासां देवता व्युत्क्रमेण वा ।
ताश्चतुर्मूर्तयस्त्वेव द्वादशार्णपदोदिताः ॥ १२ ॥

व्याहृतिदेवानाह । अनिरुद्धेति । अनिरुद्धप्रद्युम्नसङ्कर्षणवासुदेवास्तासां व्याहृतीनां देवताः । व्युत्क्रमेण वा । वासुदेवाद्यनिरुद्धान्ताः । एते अनिरुद्धाद्याः द्वादशवर्णस्य मन्त्रस्य पदैरुदितास्तद्वाच्याः परदेवता इत्यर्थः ॥ १२ ॥

नारायणाष्टाक्षराच्च व्याहृतिभ्यस्तथैव च ।
विभेदो द्वादशार्णानां केशवाद्याश्च देवताः ॥ १३ ॥

द्वादशार्णस्याभिव्यक्तिमाह । नारायणेति । नारायणमन्त्रस्याष्टाक्षरेभ्यो व्यस्तसमस्तव्याहृतिभ्यश्च द्वादशार्णानां विभेदो अभिव्यक्तिः । केशवादिदामोदरान्ताश्च वर्णदेवताः ॥ १३ ॥

१. लक्षेत् ।

नारायणाष्टाक्षराच्च व्याहृतित्रिगुणात्पुनः ।
वेदमाता तु गायत्री द्विगुणा द्वादशाक्षरात् ॥ १४ ॥

गायत्र्या अभिव्यक्तिं वक्ति । नारायणाष्टाक्षराच्चेति । व्याहृत्या व्याहरणेन त्रिगुणा चतुर्विंशत्यक्षरवेदानां माता गायत्री अभिव्यक्ता । किम्भूता द्वादशाक्षराद्द्विगुणा चतुर्विंशत्यक्षरा । केचित्तु त्रिभिर्गुणनं त्रिगुणं व्याहृतीनां अष्टाक्षरत्वेन त्रिगुणात् व्यस्तसमस्तव्याहृतीनां मन्त्रात् गायत्री जातेत्याहुः । अपरे तु द्विगुणादिति पञ्चम्यन्तं पठित्वा द्वादशाक्षरमन्त्रात् द्विवारं पठितात् तावद्गायत्री जातेत्याहुः । प्रथमद्वितीयतृतीयपदैश्च पुनस्ताभिः स्तुतिभिः समुच्चयवाचिभिर्मन्त्रत्रितयादपि गायत्री जातेति वस्तुगतिः प्रतिभाति ॥ १४ ॥

चतुर्विंशन्मूर्तयोऽस्याः कथिता वर्णदेवताः ।
तद्भेदः पौरुषं सूक्तं वेदाः पुरुषसूक्तगाः ॥ १५ ॥

केशवादिचतुर्विंशन्मूर्तयोऽस्याः गायत्र्या वर्णदेवताः क्रमेण कथिताः । पौरुषं सूक्तं तस्या गायत्र्याः भेदः भिद्यते अभिव्यज्यत इति भेदः । पुरुषसूक्तगाः । सूक्ताद्गच्छन्ति उद्गायन्ति इति पुरुषसूक्तगाः ॥ १५ ॥

वैदिकास्सर्वशब्दाश्च तस्मात्सर्वाभिधोऽस्म्यहम् ।
पञ्चाशद्वर्णभिन्नाश्च सर्वशब्दा अतोऽपि वा ॥ १६ ॥

वैदिकाः सर्वशब्दाश्च पुरुषसूक्तगा इत्यर्थः । यतश्च मम पूर्णत्वावाचकात् प्रणवात् क्रमेण सर्वे वेदा अभिव्यक्ताः तस्मादहमेक एव सर्वाभिधः । सर्वैः वैदिकशब्दैर्मुख्यया वृत्त्याऽभिधेयः । अत्र हेत्वन्तरं चाह । पञ्चाशद्वर्णेति । यतः सर्वे शब्दाः पञ्चाशद्वर्णैर्भिन्नाः पञ्चाशद्वर्णेभ्योऽभिव्यक्ता पञ्चाशद्वर्णात्मका वा । अतोऽप्यहं सर्वाभिधः । सर्ववर्णपदवाक्यानुवाक्यादिभिर्मुख्यतो वाच्य इति ॥ १६ ॥

ऋषिश्च देवतैकोऽहं तारादीनां विशेषतः ।
छन्दो मदीया गायत्री ताराष्टाक्षरयोर्मता ॥ १७ ॥

प्रणवादीनामृष्यादीनाह । ऋषिश्चेति । तारादीनां मन्त्राणामहमन्तर्यामी ऋषिः । परमात्माऽहमेव देवता च । प्रणवाष्टाक्षरयोर्मन्त्रयोर्मदीया गायत्री दैवी गायत्रीछन्द इति ॥ १७ ॥

उद्यद्भास्वत्समाभासश्चिदानन्दैकदेहवान् ।
चक्रशङ्खगदापद्मधरो ध्येयोऽहमीश्वरः ॥ १८ ॥
लक्ष्मीधराभ्यामाश्लिष्टः स्वमूर्तिगणमध्यगः ।
ब्रह्मवायुशिवाहीशविपैः शक्रादिकैरपि ॥ १९ ॥
सेव्यमानोऽधिकं भक्त्या नित्यनिःशेषशक्तिमान् ।
मूर्तयोऽष्टावपि ध्येयाश्चक्रशङ्खवराभयैः ॥
युक्ताः प्रदीपवर्णाश्च सर्वाभरणभूषिताः ॥ २० ॥

प्रणवाष्टाक्षरयोर्ध्यानमाह । उद्यदिति । उद्यदादित्यवर्णः चिदानन्दात्मकविग्रहः । दक्षिणोर्ध्वकरक्रमेण चक्रशङ्खगदापद्मानि धारयन् लक्ष्मीधराभ्यां वामदक्षिणपार्श्वगताभ्यामाश्लिष्टः स्वमूर्तीनां क्रुद्धोल्कादीनां विश्वादीनां केशवादीनां मत्स्यादीनां च क्रमेण प्रथमाद्यावरणभूतानां गणमध्यगः नारायणस्तु मध्यगः । ब्रह्मवायुशिवैः अहीशेन शेषेण विपेन गरुडेन च तद्बहिः शक्रादिलोकपालैः स्वस्वदिक्संस्थैः अधिकं यथा स्यात् तथा सेव्यमानः । नित्यनिःशेषशक्तिमान् ।नित्या अनपायिन्यो निःशेषाः पूर्णाः शक्तयो यस्य स तथा । अष्टावप्यात्माद्या वर्णदेवतामूर्तयश्च ध्येयाः । चक्रशङ्खवराभयैः युक्ताः । प्रदीपवद्वर्णो यासां ताः । सर्वैराभरणैर्भूषिताः ॥ १८ ॥ १९ ॥ २० ॥

तादृग्रूपाश्च पञ्चाशज्ज्ञानमुद्राभयोद्यताः ।
टङ्की दण्डी च धन्वी च तत्तद्युक्तास्तु वामतः ॥ २१ ॥

मातृकामन्त्रदेवताध्यानमाह । तादृग्रूपाश्चेति । पञ्चाशदजाद्याः तादृग्रूपाः प्रदीपवर्णाः ज्ञानमुद्रया अभयमुद्रया च युक्तकरद्वयाः । टङ्की दण्डी धन्विनस्तु वामतः वामकरे टङ्कादिभृतो ध्येयाः । केचिदत्र मातृकादेवानां द्विभुजत्वमेव । ज्ञानमुद्राभयोद्यता इत्युक्तेरित्याहुः । अपरे तु वराभयस्थाने ज्ञानमुद्राभये उक्तिः[1] । चक्रशङ्खयुक्तोर्ध्वभुजत्वं तु प्रागेवेत्याहुः । अत्र यथा गुरुसम्प्रदायमनुष्ठानविकल्पः ॥ २१ ॥

वासुदेवादिकाः शुक्लरक्तपीत सितोज्वलाः ।
चक्रशङ्खगदाब्जेतः प्रथमो मुसली हली ॥ २२ ॥

वासुदेवादीनां व्याहृतिदेवतानां ध्यानमाह । वासुदेवादिका इति । वासुदेवः शुक्लः

१. उक्ते ।

सङ्कर्षणो रक्तः प्रद्युम्नः पीतः अनिरुद्धः श्यामोज्वलः । तत्र प्रथमो वासुदेवः चक्रशङ्खगदाब्जेतः चक्रादियुतबाहुचतुष्टयः । अपरः सङ्कर्षणो मुसली हली । मुसलहलेक्रमेण वामदक्षिणाभ्यामधो भुजाभ्यां बिभ्रत् । ऊर्ध्वभुजद्वये तु सशङ्खचक्रः ॥ २२ ॥

सशङ्खचक्रस्त्वपरस्तृतीयः शार्ङ्गबाणवान् ।
सशङ्खचक्रस्तुर्यस्तु चक्रशङ्खासिचर्मवान् ॥ २३ ॥

तृतीयः प्रद्युम्नः शार्ङ्गबाणवान् । अधस्तनकरद्वये । उपरि भुजद्वये सशङ्खचक्रः । तुर्यश्चतुर्थोऽनिरुद्धः दक्षिणोर्ध्वभुजक्रमेण चक्रशङ्खखड्गचर्मवान् ॥ २३ ॥

केशवो मधुसूदनः सङ्कर्षणदामोदरौ ।
सवासुदेवप्रद्युम्ना दक्षोर्ध्वकरशङ्खिनः ॥ २४ ॥

गायत्रीवर्णदेवानां केशवादीनां चक्रादिभिर्विशेषलक्षणमाह । केशव इत्यादिभिः केशवाद्याः षट् दक्षिणार्ध्वकरे शङ्खयुक्ताः ॥ २४ ॥

विष्णुमाधवानिरुद्धपुरुषोत्तमाधोक्षजाः ।
जनार्दनश्च वामोच्चकरस्थितदरा मताः ॥ २५ ॥
गोविन्दश्च त्रिविक्रमस्सश्रीधरहृषीकपाः ।
नृसिंहश्चाच्युतश्चैव वामाधःकरशङ्खिनः ॥ २६ ॥
वामनः सनारायणः पद्मनाभ उपेन्द्रकः ।
हरिः कृष्णश्च दक्षाधःकरे शङ्खधरा मताः ॥ २७ ॥

विष्ण्वाद्याः षट् वामोर्ध्वकरस्थितशङ्खाः । गोविन्दादयः षट् वामाधःकरशङ्खयुक्ताः । वामनादयः षट् दक्षाधःकरशङ्खभुजः । [१]शाचगौपी शपंगोचं शपंचागं शगंचपं । शचपगं शगंपचधारिणोर्ध्वकरक्रमात् ॥ २५-२७ ॥

शङ्खचक्रगदापद्मधराश्चैते हि सर्वशः ।
क्रमव्युत्क्रमपद्मादिगदादिव्युत्क्रमस्तथा ।
अर्धक्रमः सान्तरश्च षट्सु षट्स्वरिपूर्विणाम् ॥ २८ ॥

एते केशवादयः शङ्खचक्रगदापद्मधराः । सर्वशः सर्वेऽपि क्रमव्युत्क्रमेति । अरिपूर्विणां । अरिः चक्रं पूर्वं प्रथमो येषु ते अरिपूर्विणः चक्रादयः त्रयः तेषां

१. [illegible]उच्चारणार्थाः । क्रमादिक्रमेण क्रमो ज्ञेयः ।

केशवादिषट्चतुष्टये शङ्खस्य नियतस्थानतयोक्तत्वात् । चक्रादित्रयस्य क्रमादिभेदेन षट्प्रकारः क्रमात् केशवादिषट् सुबोद्धव्याः । चक्रगदापद्ममिति क्रमः । पद्मगदाचक्रमिति व्युत्क्रमः । पद्मचक्रगदेति [1]पद्मक्रमः । गदाचक्रपद्मेति गदाव्युत्क्रमः । चक्रपद्मगदेत्यर्धक्रमः । गदापद्मचक्रमिति सान्तरक्रम इति । इह सङ्ग्रहश्लोकाः । स्यात्केशवः शाचगपैः पगचैश्च शेन नारायणश्चशपगैरथ माधवोऽपि । गोविन्दको गपशचैः पशचैश्च गेन विष्णुः तथा शपगचैश्च मधोर्निहन्ता ॥ १ ॥ त्रैविक्रमो गचशपैः चगपद्मशङ्खैः स्याद्वामनः चगशपैः कमलाधरोऽपि । आख्यायते चपशगैश्च हृषीकपो च स्यात्पद्मनाभ इह पेन चगेन शेन ॥ २ ॥ दामोदरः शगचपैः शपचक्रगैश्च सङ्कर्षणः शचपगैरथ वासुदेवः । प्रद्युम्नकः शगपचैरनिरुद्धरूपः ख्यातो गदाशपचकैः पुरुषोत्तमोऽधात् ॥ ३ ॥ बाहुस्थितैः पशगचैः गशचक्रपद्मैः ख्यातो ह्यधोक्षज इहाथ नृपश्ववक्त्रः । पद्मं गदां च जलजं सुसुदर्शनं च बिभ्रद्भुजैः पचशगैः कथितोऽच्युतोऽपि ॥ ४ ॥ उक्तो जनार्दन इतीह चशंगपेन कौमोदकीं चापदरैरुदितो ह्युपेन्द्रः । उक्तो हरिश्चपगशैः गपचैश्चशेन कृष्णः क्रमोऽयमिह दक्षतनूर्ध्वबाहुः ॥ ५ ॥ ॥ २८ ॥

वर्णानां देवतानां च नित्यत्वान्न क्रमः स्वतः ।
व्यक्तिक्रमं ब्रह्मबुद्धावपेक्ष्य क्रम उच्यते ॥ २९ ॥

ननु प्रणवादिमन्त्राणां तद्देवतानां च नित्यत्वात् कथमयं पूर्वोक्तक्रम इत्याशङ्क्याह । वर्णानामिति । ब्रह्मणो बुद्धौ यत्प्रथमं व्यक्तं तदेव प्रथमं यत्ततोऽनु तद्द्वितीयमिति व्यक्तिक्रमादेव क्रमकथनोपपत्तिरिति ॥ २९ ॥

समासव्यासयोगेन व्याहृतीनां चतुष्टयम् ।
सत्यं चाङ्गानि तारस्य प्रोच्यन्तेऽष्टाक्षरस्य च ॥ ३० ॥

प्रणवादीनामङ्गान्याह । समासेति । भूर्भुवःस्वः इति समासः व्यस्तास्तिस्रः । ॐ भूः वासुदेवात्मने हृदयाय नमः इत्यादि प्रयोगः ॥ ३० ॥

क्रुद्धमहावीरद्युल्कसहस्रसहितोल्ककाः ।
चतुर्थ्यन्ता हृदादीनि पृथग्रूपाणि तानि च ॥ ३१ ॥

अष्टाक्षरस्य तु क्रुद्धोल्कमहोल्कवीरोल्कद्युल्कसहस्रोल्काः चतुर्थ्यन्ताः पञ्चाङ्गानि विष्णोः स्वरूपाणि क्रुद्धोल्कादीनीत्याह । पृथगिति । विष्णोरेव पृथग्रूपाणीत्यर्थः ॥ ३१ ॥

---

१. पद्मादिक्रमः ।

विष्णोरेवात्यभेदेऽपि तदैश्वर्यात्तदन्यवत् ।
चक्रशङ्खवराभीतिहस्तान्येतानि सर्वशः ॥ ३२ ॥
मूलरूपसवर्णानि कृष्णवर्णा शिखोच्यते ।
चतुर्विंशन्मूर्तयश्च मूलरूपसवर्णकाः ॥ ३३ ॥

अत्यभेदे अत्यन्ताभेदेऽपि तदन्यवत्प्रतिभासन्ते। तत्र हेतुः तदैश्वर्यादिति। तस्यैव विष्णोरैश्वर्यादिति। तस्यैव विष्णोरैश्वर्यात्। सामर्थ्यात्। यद्वा सर्वेषां उद्यद्भास्वद्वर्णत्वेऽपि शिखा शिखा शिखास्थानीयः वीरोल्कः। केशपाशः कृष्ण एव। केशवादीनां वर्णमाह। चतुर्विंशदिति । मूलरूपसमानवर्णकाः। उद्यत्सूर्याभा इत्यर्थः ॥ ३२-३३ ॥

आदिवर्णत्रयं नाभिहृच्छिरस्सु यथाक्रमम् ।
न्यसनीयं च तद्वर्णदेवताध्यानपूर्वकम् ॥ ३४ ॥

प्रणवमन्त्रस्य वर्णन्यासमाह। आदिवर्णत्रयमिति। अकारादिवर्णत्रयं अवर्णदेवता विश्वः, उवर्णदेवता तैजसः, मकारदेवता प्राज्ञः । नाभिहृच्छिरस्स्विति संहृतिन्यासाभिप्रायेण। ॐ अं विश्वाय नमः इत्यादिप्रयोगः । न्यसेद्वर्णान्सबिन्दुकानित्यागमान्तरात् ॥ ३४ ॥

पज्जानुनाभिहृदयवाङ्नासानेत्रकेषु च ।
अष्टाक्षराणां न्यासः स्यात् व्याहृतीनां प्रजापतिः ॥ ३५ ॥
मुनिश्छन्दस्तु गायत्री देवता भगवान् हरिः ।
उद्यदादित्यवर्णश्च ज्ञानमुद्राभयोद्यतः ॥ ३६ ॥

अष्टाक्षरस्य वर्णन्यासमाह। पज्जान्विति। संहारक्रमेण स्थानोक्तिः। सृष्टिक्रमस्तु मस्तकादिरिति ज्ञेयम् । ॐ अं विश्वात्मने नमः शिरसीत्यादि । व्याहृतिमन्त्रस्य ऋष्यादीनाह। व्याहृतीनामिति ॥ ३५ ॥ व्याहृतिदेवताध्यानमाह । उद्यदिति । अधोभुजयोर्ज्ञानमुद्राभयमुद्रे । ऊर्ध्वभुजद्वये तु चक्रशङ्खावेवेति । चतुर्भुजत्वमेव सर्वत्र ध्येयम्। केचित् ज्ञानमुद्राभयद्वयस्यैवोक्तत्वाद्विभुजत्वमेवेत्याहुः ॥ ३६ ॥

तारेण व्याहृतिभिश्च ज्ञेयान्यङ्गानि पञ्च च ।
नाभिहृत्केषु सर्वेषु चतस्रो व्याहृतीर्न्यसेत् ॥ ३७ ॥

व्याहृतिमन्त्रस्य पञ्चाङ्गान्याह। तारेणेति। व्याहृतिभिः व्यस्तसमस्तभिश्चतसृभिः। न्यासान्तरमाह। नाभीति। नाभिहृदयशिरस्सु सर्वाङ्गेषु चतस्रो व्याहृतीर्न्यसेत्। अत्रापि ॐ भूः वासुदेवात्मने नमः नाभावित्यादि ज्ञेयम् ॥ ३७ ॥

द्वादशार्णास्य जगती छन्दोऽन्यत्तारवत्स्मृतम् ।
अच्छवर्णोऽभयवरकरो ध्येयोऽमितद्युतिः ॥ ३८ ॥
पदैर्व्यस्तैः समस्तैश्च ज्ञेयान्यङ्गानि पञ्च च ।
अष्टाक्षराणां स्थानेषु बाह्वोरूर्वोश्च विन्यसेत् ॥ ३९ ॥

पञ्चाङ्गान्याह। पदैरिति। मन्त्रस्य प्रणवादि चतुर्भिः पदैः समस्तेन च पञ्चाङ्गानि। न्यासः पददेवतासाहित्येन कार्यः। देवताध्यानपूर्वकमित्युक्तत्वात्। ॐ वासुदेवात्मने हृदयाय नम इत्यादि प्रयोगः। वर्णन्यासमाह। अष्टाक्षराणामिति। स्थानेषु पज्जान्वादिषु बाह्वोरुर्वोश्च वर्णान् न्यसेत् सदैवान्। ॐ ॐ केशवाय नमः शिरसि ॐ नं नारायणाय नम इत्यादि तत्क्रमेण प्रयोगः ॥ ३८-३९ ॥

विश्वामित्रस्तु सन्ध्यार्थे तदन्यत्र प्रजापतिः ।
मुनिर्देवश्च सवितृनामा स्रष्टृत्वतो हरिः ॥ ४० ॥

गायत्र्या ऋष्यादिकमाह । विश्वामित्रस्त्विति । सन्ध्याया अर्थे सन्ध्योपासनाङ्गगायत्र्याः विश्वामित्र ऋषिः। अन्यत्र ब्रह्मा। स्रष्टृत्वहेतोः सवितृनामकहरिः देवः ॥ ४० ॥

प्रोद्यदादित्यवर्णश्च सूर्यमण्डलमध्यगः ।
चक्रशङ्खधरोऽङ्कस्थदोर्द्वयो ध्येय एव च ॥ ४१ ॥

ध्यानमाह। प्रोद्यदिति। उपरि भुजाभ्यां शङ्खचक्रधरः। अङ्कस्थिताधःस्थनपाणिद्वयः ॥ ४१ ॥

सताराश्च व्याहृतयो गायत्र्यङ्गानि पञ्च च ।
दोःपत्सन्धिषु साग्रेषु नाभिहृन्मुखकेषु च ॥ ४२ ॥

पञ्चाङ्गान्याह । सताराश्चेति । व्याहृत्यङ्गवत् प्रयोगः । वर्णन्यासमाह । दोःपत्सन्धिषु साग्रेषु इति। अग्रसहितेषु भुजपत्सन्धिषु पञ्चसु विंशत्यक्षराणि। चत्वारि नाभिहृदयमुखशिरस्सु न्यसेदित्यर्थः । अत्रापि केशवादिवर्णदेवतासाहित्यमवगन्तव्यम् ॥ ४२ ॥

वर्णन्यासश्च कर्तव्यस्तारवन्निखिलं स्मृतम् ।
पञ्चाशदक्षराणां च पुंसूक्तस्यापि सर्वशः ॥ ४३ ॥

मातृकापुरुषसूक्तयोः ऋष्यादीनाह। तारवदिति। पञ्चाशदक्षराणां पुरुषसूक्तस्यापि अनुष्टुप् छन्दः । ऋषिदेवते तारवत् प्रणवमन्त्रस्यैव ॥ ४३ ॥

अनुष्टुभश्च त्रिष्टुप् च छन्दोऽस्य त्रिष्टुभोऽपि वा ।
विष्णुशब्दश्चतुर्थ्यन्तो हृदयेतः षडक्षरः ॥ ४४ ॥

पुंसूक्तस्य अन्त्यमन्त्रस्य त्रिष्टुप् छन्दः । तैत्तिरीयाणां पुरुषसूक्ते बहुमन्त्राणां त्रिष्टुप्त्वाभिप्रायेण त्रिष्टुभोऽपि वेति बहुवचनम् । विष्णुमन्त्रमाह । विष्णुशब्द इति । हृदये नमःशब्देन षणयोः भेदेन षडक्षरत्वम् । तथापि विष्णवे नम इति अयं मन्त्रप्रकारः सस्नापताखवत् ॥ ४४ ॥

तारवत्सर्वमस्यापि श्यामो ध्येयो हरिः स्वयम् ।
वर्णा एव षडङ्गानि षणयोर्भेदयोगतः ॥ ४५ ॥

अस्यापि तारवत् सर्वं छन्दो ऋषिर्देवताः । श्यामः इन्द्रनीलसमाभासः । षकारणकारयोर्भेदेन षड्वर्णैरङ्गन्यासः ॥ ४५ ॥

पज्जानुनाभिहृन्नासाकेषु न्यासश्चवर्णशः ।
एते तु सर्वमन्त्राणां मूलमन्त्रा विशेषतः ॥ ४६ ॥
एतज्ज्ञानात्समस्तं च ज्ञातं स्याच्छब्दगोचरम् ।
एतज्जपात्समस्तानां मन्त्राणां जापको भवेत् ॥ ४७ ॥

संहृतिक्रमेण वर्णन्यासस्थानमाह । पज्जान्विति । अत्र तारवदित्युक्तेः विश्वादीनां वर्णदेवतात्वमवधेयम् । तथाच तत्सङ्कलितानामेव वर्णानां न्यास इति । अत्र प्रणवादीनां येन क्रमेण अङ्गन्यासान्यभिहितानि स एव क्रमो जपे ज्ञेयः । केचित्तु अभिव्यक्तिक्रमेणैव जपक्रम इति वदन्ति । बहवः साम्प्रदायिकाः प्रणवजपे परिव्राजकानामेवाधिकारो न गृहस्थानामित्याहुः । अपरे तु प्रणवपठितमन्त्राणामधिकफलतयोक्तेः निषेधाश्रवणाच्च गृहस्थानामधिकार इत्याहुः । ननु भगवन्मन्त्राणां बहूनां विद्यमानत्वात् कथमष्टानामेवाङ्गादिकमुक्तं इत्यत आह । एते त्विति । मूलमन्त्राः आदिमन्त्राः । अत एते प्रथमत उक्ताः । अन्येऽपि चतुर्थाध्याये वक्ष्यन्ते ॥ ४६-४७ ॥

पूज्यश्च भगवान्नित्यं चक्राब्जादिकमण्डले ।
हृदये वा चले वाऽपि जले वा केवले स्थले ॥ ४८ ॥

इदानीमर्चनविधिमाह । पूज्यश्चेति । चक्राब्जलक्षणं वक्ष्यते । आदिशब्देन सर्वतोभद्रादि । हृदये मानसोपचारैः । जले अर्घ्यादिभिः गन्धपुष्पादिभिः । चले च चलप्रतिमायां सालिग्रामे वा । केवलस्थले स्थण्डिले ॥ ४८ ॥

अष्टाक्षरेण सम्पूज्य प्रथमं देवतां पराम् ।
मध्ये सव्ये गुरूंश्चैव दक्षिणे सर्वदेवताः ॥ ४९ ॥
पुनः सव्ये सर्वगुरूनाग्नेयादिषु च क्रमात् ।
गरुडं व्यासदेवं च दुर्गां चैव सरस्वतीम् ॥ ५० ॥

पीठदेवार्चनमाह । अष्टाक्षरेणेति ॥ ४९-५० ॥

धर्मं ज्ञानं च वैराग्यं ऐश्वर्यं चैव कोणगान् ।
तदन्तः पूर्वदिक्पूर्वमधर्मादींश्च पूजयेत् ॥ ५१ ॥
अपूजिता अधर्मादिदातारस्ते तथाऽभिधाः ।
निर्ऋतिश्चैव दुर्गा च कामो रुद्रश्च देवताः ॥ ५२ ॥
यमवायुशिवेन्द्राश्च ज्ञेया धर्मादिदेवताः ।
परमः पुरुषो मध्ये शक्तिराधाररूपिणी ॥ ५३ ॥
कूर्मोऽनन्तश्च पृथिवी क्षीरसागर एव च ।
श्वेतद्वीपो मण्टपश्च दिव्यरत्नमयो महान् ॥ ५४ ॥

तदन्तः तन्मध्ये । पूर्वदिक्पूर्वं । पूर्वादिदिक्षु । अत्र देवस्य पुरतः प्राचीति बहवः साम्प्रदायिकाः । अपरे तु मनुष्यप्राचीत्याहुः ॥ ५१-५४ ॥

पद्ममेतत्त्रयं देवी रमैव बहुरूपिणी ।
सूर्यसोमहुताशाश्च पद्मे श्रीस्त्रिगुणात्मिका ॥ ५५ ॥
आत्मान्तरात्मपरमज्ञानात्मानश्च मूर्तयः ।
विमलोत्कर्षणी ज्ञाना क्रिया योगा तथैव च ॥ ५६ ॥
प्रह्वी सत्या तथेशानाऽनुग्रहा चेति शक्तयः ।
अष्टदिक्षु च मध्ये च स्वरूपाण्येव ता हरेः ॥ ५७ ॥

एतत्त्रयं श्वेतद्वीपरत्नमण्डपपद्मानां त्रयं लक्ष्मीरूपमेव ॥ ५५-५७ ॥

ततोऽनन्तं योगपीठस्वरूपं पूजयेद्धरेः ।
तत्रावाह्य हरिं चार्घ्यं पाद्यमाचमनीयकम् ॥ ५८ ॥

तत्र पूजिते पीठे । आवाह्य ॥ ५८ ॥

मधुपर्कं पुनश्चाचां स्नानं वासो विभूषणम् ।
उपवीतासने दत्वा गन्धपुष्पे तथैव च ॥ ५९ ॥

पुनश्च पुनरपि । आचां आचमनीयं । चमु अदने इत्यस्मादौणादिको वा ॥ ५९ ॥

लक्ष्मीधरे यजेत्तत्र पार्श्वयोरुभयोर्हरेः ।
हृदयादींस्तथेन्द्रादिदिक्ष्वस्त्रं कोणकेषु च ।। ६० ।।

आवरणदेवतार्चनमाह । लक्ष्मीधर इति । हृदयादीन् कृद्धोल्कादीन् । अस्त्रं सहस्रोल्कम् ।। ६० ।।

वासुदेवादिकान् दिक्षु केशवादींस्ततः परम् ।
मत्स्यं कूर्मं वराहं च नारसिंहं च वामनम् ।। ६१ ।।
भार्गवं राघवं कृष्णं बुद्धं कल्किनमेव च ।
अनन्तं विश्वरूपं च तद्बहिः पूजयेत्क्रमात् ।। ६२ ।।

वासुदेवादिकान् । वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धान् ।। ६१-६२ ।।

अनन्तब्रह्मवाय्वीशान्वीशं चाग्रे प्रपूजयेत् ।
वारुणीं चैव गायत्रीं भारतीं गिरिजामपि ।। ६३ ।।
कोणेषु वीन्द्रवामे च सौपर्णीं पूजयेदपि ।
इन्द्रादीन् शेषविध्यन्तान् सभार्यान् सपरिग्रहान् ।। ६४ ।।

वीशं गरुडं ।। ६३-६४ ।।

धूपदीपौ ततो दत्वा नैवेद्यं मूलमन्त्रतः ।
अनेन क्रमयोगेन जुहुयात्संस्कृतेऽनले ।। ६५ ।।

मूलमन्त्रतः मूलमन्त्रेण । अनुयागमाह । अनेनेति । केचित् अनेन पूर्वोक्तपीठार्चनक्रमेणेत्याहुः । अनेन वक्ष्यमाणप्रकारेण इति सम्प्रदायविदः । संस्कृते स्वस्वशाखोक्तसंस्कारैः ।। ६५ ।।

पुष्पाञ्जलिश्च होमश्च मूलेनाष्टोत्तरं शतम् ।
सकृत्सकृत्पुष्पमन्यैर्होमस्तस्य चतुर्गुणः ।। ६६ ।।

मूलेन अष्टाक्षरेण अष्टोत्तरशतं पुष्पाञ्जलयो होमश्च । अन्यैः द्वादशाक्षरादिभिः । पुष्पं सकृत् सकृत् । होमस्तु तस्य पुष्पस्य चतुर्गुण इति । अन्ये तु अन्यैः पीठावरणमन्त्रैः सकृत् पुष्पहोमः । होमस्तु तस्य पुष्पस्य चतुर्गुण इत्याहुः ।। ६६ ।।

विसर्जयित्वा नैवेद्यं मूलेन त्रिःसमर्च्य च ।
धूपदीपौ पुनर्दत्वा पुनर्मूलेन पूर्ववत् ।। ६७ ।।

अर्चयित्वा पुनर्ध्यात्वा जपेदष्टोत्तरं शतम् ।
पुनर्ध्यायेद्धरिं सर्वदेवदेवेश्वरं प्रभुम् ॥ ६८ ॥

नैवेद्यं विसृज्य मूलेन मूलमन्त्रेण त्रिःत्रिवारं समर्च्य श्रीतुलसीपुष्पादिभिः ॥ ६८ ॥

जपध्यानहुतार्चादीनेवं यः कुरुते सदा ।
धर्मार्थकाममोक्षाणां भाजनं स्यात्स एव हि ॥ ६९ ॥
सर्वोत्तमं हरिं ज्ञात्वा य एवं भक्तिपूर्वकम् ।
जपध्यानादिभिर्नित्यं पूजयेन्नास्य दुर्लभम् ॥ ७० ॥
भक्तिं कृत्वाऽन्यदेवेषु ब्रह्मरुद्रादिकेष्वपि ।
सर्वोत्कर्षमविज्ञाय विष्णोर्याति तमो ध्रुवम् ॥ ७१ ॥
न यज्ञा न च तीर्थानि नोपवासव्रतानि च ।
दैवतानि च सर्वाणि त्रातुं तं शक्नुयुः क्वचित् ॥ ७२ ॥
हरिर्हि सर्वदेवानां परमः पूर्णशक्तिमान् ।
स्वतन्त्रोऽन्ये तद्वशा हि सर्वेऽतः स जगद्गुरुः ॥ ७३ ॥

भाजनं पात्रम् ॥ ६९-७३ ॥

ब्रह्मादयश्च तद्भक्त्या भागिनो भोगमोक्षयोः ।
तस्माज्ज्ञेयश्च पूज्यश्च वन्द्यो ध्येयः सदा हरिः ॥ ७४ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते
तन्त्रसारसङ्ग्रहे प्रथमोऽध्यायः ॥ १ ॥

ब्रह्मादयोऽपि तद्भक्त्यैव भोगमोक्षयोः भागिनः । तस्माद्धरिरेव ज्ञेयः । पूज्यो वन्द्यो नम्यः स्तव्यो ध्येयश्चेति ॥ ७४ ॥

इति श्रीमध्वमाधवानुग्रहैकसहायवेदवेद्यशिष्यविरचिते
श्रीमत्तन्त्रसारसङ्ग्रहव्याख्याने तन्त्रसारविवृतौ
प्रथमोऽध्यायः समाप्तः ॥ १ ॥

॥ अथ द्वितीयोऽध्यायः ॥

यस्य कस्यापि मन्त्रस्य न्यासः पञ्चाशदक्षरैः ।
वीर्यदः केऽभितो वक्त्रमक्षिकर्णेषु नासयोः ॥ १ ॥
गण्डयोरोष्ठयोर्दन्तपङ्क्त्योर्मूर्धनि वाचि च ।
दोःपत्सन्धिषु साग्रेषु पार्श्वयोः पृष्ठगुह्ययोः ॥ २ ॥

अस्मिन्नध्याये मातृकान्यासप्राणायामकलशार्चनादिकं निरूपयति । यस्येत्यादिना । पञ्चाशदक्षरैः न्यासो यस्य कस्यापि । सर्वस्यापीत्यर्थः । वीर्यदः । वीर्यं देवतानुग्रहलक्षणं ददातीति वीर्यदः । के मस्तके । अभितोवक्त्रं मुखपरितः ॥ १-२ ॥

तुन्दे च हृदि धातूनां सप्तके प्राणजीवयोः ।
सक्षकारान् न्यसेद्वर्णान् नृसिंहः क्षस्य देवता ॥ ३ ॥

क्षस्य नरसिंहो देवता । तेन सह[1] एकपञ्चाशद्वर्णाः अजादिदेवसङ्कलिता न्यसनीयाः ॥ ३ ॥

जपे न्यासे च विहितः क्षोऽक्षराणां सदाऽन्ततः ।
प्राणायामो रेचयित्वा पूरयित्वा च कुम्भके ॥ ४ ॥

प्राणायाममाह । प्राणायाम इति । रेचनं श्वासस्याधोविसर्जनं । पूरणं ऊर्ध्वनयनम् । कुम्भकं निरोधः ॥ ४ ॥

तारैस्त्रिर्द्वादशावृत्तद्व्येकद्वादशकेन वा ।
तत्तन्मन्त्रेण वा कार्यो गायत्र्या दशतारकैः ॥ ५ ॥

तस्य प्रणवस्य त्रिवारं द्वादशावृत्तैः षड्विंशद्भिः । द्विर्द्वादशकेन चतुर्विंशतिभिः । एकद्वादशकेन वा । एतत्सङ्ख्यैः प्रणवैः प्राणायाम इत्यर्थः । तत्तन्मन्त्रेण द्वित्र्याद्यावृत्तेन । गायत्र्यास्तु दशतारकैः । दशभिः प्रणवैः प्राणायामः कर्तव्य इति शेषः । अत एवाह याज्ञवल्क्यः । सव्याहृतिकप्रणवां गायत्रीशिरसा सह । त्रिःपठेदायतप्राणः प्राणायामः स उच्यत इति ॥ सप्तव्याहृत्यादौ सप्तप्रणवाः । गायत्र्यादावेकः । ॐ आपोज्योतिरित्यादि

१.क्षेण सह ।

शिरोमन्त्रादावेकः। अन्ते चैकः। एवं दशप्रणवयुक्तगायत्र्या रेचकादि त्रये त्रिंशत्प्रणवत्वम् ॥ ५ ॥

आदावेव जपे कुर्याच्छोषणं दहनं प्लवम्[1] ।
वाय्वग्निवारुणैर्बीजैर्ध्यात्वा तन्मण्डले हरिम् ॥ ६ ॥

प्राणायामस्य भूतशुद्धिमाह। आदावेवेति। जपे कर्तव्ये आदौ वाय्वादिबीजैः शोषणादि कुर्यात्। तन्मण्डले वाय्वादीनां मण्डले वाय्वादिबीजाभ्यां देहस्थ पापपुरुषस्य शोषणदहने कृत्वा वरुणबीजेन स्वदेहं अमृतेन प्लावमानं भावयेत् ॥ ६ ॥

एकपञ्चाशद्वर्णानां चतुर्विंशतिमूर्तयः ।
आत्माद्या वासुदेवाद्या विश्वाद्या मत्स्यकच्छपौ ॥ ७ ॥
कोलो नृसिंहः सवटुर्जामदग्न्यरघूद्वहौ ।
वासिष्ठयादवौ कृष्णावात्रेयो बुद्धकल्किनौ ॥ ८ ॥
शिंशुमारश्चेति शतं कलाः कलशनामकाः ।
एताभिः सहितां मूलमूर्तिं कुम्भोदके सुधीः ॥ ९ ॥

कलशार्चनमाह। एकपञ्चाशदिति। अजाद्येकपञ्चाशद्वर्णमूर्तयः। केशवाद्याः चतुर्विंशतिः। आत्माद्याश्चत्वारः। वासुदेवाद्याश्चत्वारो विश्वाद्याश्चत्वारो मत्स्याद्याश्च शिंशुमारान्ताः शतं कलाः अंशाः ॥ ७-९ ॥

पूर्वोक्तविधिनाऽभ्यर्च्य प्रतिमां शिष्यमेव वा ।
स्नापयेत्पूर्वमर्चायां जपोऽनूनः सहस्रतः ॥ १० ॥

पूर्वोक्तविधिना पीठार्चनावाहनार्घ्याद्युपचारैरभ्यर्च्य मूलमूर्तिं नारायणमर्चायां प्रतिमायां स्नानात्पूर्वं सहस्रतोऽनूनो जपः कर्तव्यः ॥ १० ॥

मूलमन्त्रस्य चाङ्गानां न्यासः स्नानादनन्तरम् ।
प्रतिमायां सन्निधिकृच्छिष्ये माहात्म्यकृद्भवेत् ॥ ११ ॥

मूलमन्त्रस्याष्टाक्षरस्य अङ्गानां कृद्धोल्कादीनां स्नानाभिषेकानन्तरं न्यासः प्रतिमायां हरेः सान्निध्यकृत्[2]। शिष्ये तु दीक्षावसरे माहात्म्यकृत्। भक्तिज्ञानादिकृत् ॥ ११ ॥

१. पा-प्लुतिम्। २. सन्निधानकृत्।

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं भगम् ।
योग्यतां पापहानिं च पुण्यवृद्धिं च साधयेत् ॥ १२ ॥

कलशार्चनस्यावान्तरं फलमाह । कलशः कीर्तिमिति । प्रज्ञां बुद्धिं मेधां धारणशक्तिं भगं ऐश्वर्यं । योग्यतां अधिकारं भगवत्परिचर्यादौ ॥ १२ ॥

उपसर्गेषु जातेषु दैवभूतात्महेतुषु ।
आयुषे वाऽथ शान्त्यै वा श्रियै वा पुण्यवृद्धये ॥ १३ ॥

इदानीं विशेषहोमं वक्तुं निमित्तान्याह । उपसर्गेष्विति।उपसर्गेषु उपद्रवेषु ॥ १३ ॥

योग्यतायै मन्त्रसिध्यै विष्णोः प्रीत्यर्थमेव वा ।
जुहुयात्सहस्रमयुतं लक्षं कोटिमथापि वा ॥ १४ ॥

सहस्रमित्यादिविकल्पो निमित्ताल्पत्वबाहुत्वापेक्षः । शक्त्यपेक्षो वा ॥१४ ॥

पूर्ववत्संस्कृते वह्नौ ध्यात्वा देवं जनार्दनम् ।
कृत्वा त्रिमेखलं कुण्डं चतुर्विंशाङ्गुलोच्छ्रितम् ॥ १५ ॥

संस्कृते वह्नौ पूर्वपीठदेवतार्चनपूर्वं जुहुयादिति पूर्वेण सम्बन्धः । त्रिमेखलं वेदित्रयोपेतम् । चतुर्विंशाङ्गुलोच्छ्रितं ॥ १५ ॥

तावत्खातं चतुष्कोणमुच्छ्रितं द्वादशैव वा ।
द्व्यङ्गुलं त्र्यङ्गुलं वाऽपि चतुरङ्गुलमेव वा ॥ १६ ॥

तावत्खातं चतुर्विंशाङ्गुलमितखातम् । द्वादशेन द्वादशकेन अङ्गुलीनां उच्छ्रितं ॥ १६ ॥

विस्तारो मेखलानां स्यादन्त्या वा चतुरङ्गुला ।
चतुर्विंशाङ्गुला वा तद्विस्तारो द्वादशैव वा ॥ १७ ॥

मेखलानां विस्तारस्तु द्व्यंगुलः त्र्यङ्गुलः चतुरङ्गुलो वा विधेयः । अन्त्या तृतीयैव वा चतुरङ्गुलमिति वा कार्या । तिसृणामपि मेखलानां चतुर्विंशाङ्गुलो वा विस्तारः द्वादशाङ्गुलो वा ॥ १७ ॥

अश्वत्थपत्राकृतिः स्यान्मूलतो द्वादशाङ्गुला ।
योनिः खाते च विनता प्रविष्टा द्व्यङ्गुलं तथा ॥ १८ ॥

योनिलक्षणमाह । अश्वत्थपत्राकारमूलतः मूलादारभ्य द्वादशाङ्गुलिं विनता । द्व्यङ्गुले खाते प्रतिष्ठा कार्येत्यर्थः । अङ्गुलपरिमाणं तु वक्ष्यते तिर्यग्यवोदराणीत्यादिना ॥ १८ ॥

तदात्मनि हरिं ध्यात्वा कुण्डे देवीं श्रियं तथा ।
विष्णुवीर्यात्मकं वह्निं निक्षिपेत्प्रणवेन ह ॥ १९ ॥

वह्निस्थापनमाह । तदात्मनीति । तदात्मनि । तद्रूप उक्तलक्षणे कुण्डले हरिं देवीं श्रियं च ध्यात्वा प्रणवेन विष्णुवीर्यात्मकवह्निं निक्षिपेत् ॥ १९ ॥

कुर्यात्क्रियाः षोडश च व्याहृतिभिः पृथक् पृथक् ।
वह्नेस्तद्गहरेः प्रीतिं कुर्वन् द्रव्यैर्यजेत्ततः ॥ २० ॥

कुर्यादिति । व्याहृतिभिः व्यस्तसमस्ताभिः वह्नेः षोडशसंस्कारान् गर्भाधानादीन् कुर्यात् । गर्भाधानं पुंसवनं सीमन्तो वैष्णवो बलिः । जातकं नामनिष्क्रामोऽन्नप्राशनं चौलकर्म च । उपनीतिर्महानाम्नी महाव्रतमतः परम् । उपाकर्म च गोदानं समावर्तमतः परम् । विवाहश्चेति विष्णुतीर्थीये । अन्यत्रापि विवाहान्ताः शुभे प्रोक्ता अशुभे मरणान्त्यका इति । तत्पक्षे विष्णुबलिर्नास्तीति द्रष्टव्यम् । एकैकसंस्कारार्थं चतस्रश्चतस्रः आहुतीर्दद्यात् ॥ २० ॥

आज्येन वा पायसेन समिद्भिः क्षीरिणामथ ।
तिलैर्वा तण्डुलैर्वाऽपि मधुरैस्त्रिभिरेव वा ॥ २१ ॥

होमद्रव्याण्याह । आज्येनेति । आज्येन गव्येन पायसेन वा गोक्षीरसिद्धेन । क्षीरिणां औदुम्बरादीनां समिद्भिः । त्रिभिः मधुरैः घृतमधुशर्करादिभिः ॥ २१ ॥

ब्रह्मवृक्षसमिद्भिर्वा समिद्भिर्वाऽमृतोद्भवैः ।
अमृताः समिधो ज्ञेयाः सर्वत्र चतुरङ्गुलाः ॥ २२ ॥

ब्रह्मवृक्षः पलाशः । अमृताः गुडूचीसमिधः । चतुरङ्गुलमिताः सर्वहोमेषु ॥ २२ ॥

एवमेव तु दीक्षायामाज्येनैवाहुतिक्रिया ।
पूजा च कार्या विधिवत्पूर्वं सर्वहुतेष्वपि ॥ २३ ॥
गुरवे दक्षिणां दद्याल्लक्षे लक्षे शतं सुधीः ।
आत्मनैव कृते होमे शक्तितो गुरुदक्षिणाम् ॥ २४ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते
श्रीमत्तन्त्रसारसङ्ग्रहे द्वितीयोऽध्यायः ॥ २ ॥

इति श्रीमध्वमाधवानुग्रहैकसहायवेदवेद्यशिष्यविरचिते
श्रीमत्तन्त्रसारसङ्ग्रहव्याख्याने तन्त्रसारविवृतौ
द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

।। अथ तृतीयोऽध्यायः ।।

प्रतिष्ठां कारयन् विष्णोः कुर्यात् सुप्रतिमां बुधः ।
लोहैर्वा शिलया दार्वा मृदा वापि यथाक्रमम् ।। १ ।।

प्रतिमाप्रतिष्ठां विवक्षुः अस्मिन्नध्याये प्रतिमालक्षणमाह । प्रतिष्ठामिति । प्रतिष्ठां कारयन् । कारयिष्यन् । लोहैः-सुवर्णादिधातुभिः । दार्वा । चन्दनादिकाष्ठेन ।। १ ।।

षण्णवत्यङ्गुलां योग आसीनामथवा स्थिताम् ।
शयानां वा मुमुक्षूणां व्याचक्षाणां निजां स्थितिम् ।। २ ।।

षण्णवत्यङ्गुलपरिमितां । योगे योगपदे आसीनां । मुमुक्षूणां निजां स्थितिं । स्वस्वरूपं व्याचक्षाणां शयानां वा व्याचक्षाणामित्यन्वयः ।। २ ।।

मूखादूर्ध्वं त्र्यङ्गुलोच्चां नवाङ्गुललसन्मुखाम् ।
सुवृत्तत्र्यङ्गुलग्रीवामास्तनाच्च षडङ्गुलाम् ।। ३ ।।

षण्णवत्यङ्गुलत्वमाह । मुखादूर्ध्वमित्यादि सहार्धचतुरङ्गुलामित्यन्तेन । मुखादूर्ध्वं शिरःपर्यन्तं त्र्यङ्गुलोच्चां नवाङ्गुलपरिमितं लसन् मुखं यस्याः सा तां । सुवृत्ता त्र्यङ्गुलपरिमिता ग्रीवा यस्याः सा तां । आस्तनाच्च स्तनपर्यन्तं ग्रीवाया अधस्तात् षडङ्गुलां ।। ३ ।।

पश्चादशाङ्गुलां नाभेरासार्द्धदशकाङ्गुलाम् ।
वृषणादामूलतश्च सार्धत्र्यङ्गुलमायताम् ।। ४ ।।

नाभेः आनाभिपर्यन्तं स्थनादधस्तात् पश्चादशाङ्गुलां । वृषणात् आ वृषणपर्यन्तं नाभेरधस्तात् सार्धदशाङ्गुलां । आमूलतः मूलाधारणपर्यन्तं सार्धत्र्यङ्गुलमायताम् । आ आ मूलतः इति पदच्छेदः । एकस्यैवाङो देहलीदीपन्यायेन उभयसम्बन्धो वा ।। ४ ।।

तावदा गुदतो दीर्घां चैत्यादष्टादशाङ्गुलाम् ।
तथा त्र्यङ्गुलचैत्यां च द्वाविंशज्जङ्घया युताम् ।। ५ ।।

आगुदतः अपानपर्यन्तं तावत् सार्धत्र्यङ्गुलदीर्घां । चैत्यात् जानुतः आजानुपर्यन्तं अष्टादशाङ्गुलां । तथा त्र्यङ्गुलचैत्यां त्र्यङ्गुलपरिमितजानुदेशां । द्वाविंशदङ्गुलमितजङ्घया युताम् ।। ५ ।।

आरभ्य गुल्फमध्यं च सहार्धचतुरङ्गुलाम् ।
षडङ्गुलोच्चप्रपदां सार्धद्व्यङ्गुलमेव च ॥ ६ ॥

गुल्फमारभ्य सार्धचतुरङ्गुलां। प्राचीनैस्तु सार्धचतुरङ्गुलं प्रपदं स्यादिति व्याख्यातं। षडङ्गुलोच्चप्रपदादिभागाम् । सार्धत्र्यङ्गुलप्रपदमध्याम् ॥ ६ ॥

प्रपदोच्चयुतामन्ते द्व्यङ्गुलप्रपदोच्छ्रयाम् ।
त्र्यङ्गुलद्व्यङ्गुलामर्धहीनमध्याङ्गुलामपि ॥ ७ ॥

अन्ते प्रपदाग्रे द्व्यङ्गुलप्रपदोच्छ्रयां। त्र्यङ्गुलद्व्यङ्गुलां त्र्यङ्गुलमिते द्वे अङ्गुल्यौ अङ्गुष्ठं तदनन्तराङ्गुलिश्च यस्यास्ताम् । अर्धहीनमध्याङ्गुलाम् । अर्धहीनं अङ्गुलं सार्धद्व्यङ्गुलं तत्परिमिता मध्याङ्गुलिर्यस्याः ताम् ॥ ७ ॥

त्रिपादाङ्गुलहीनान्यां ततस्तादृशतत्पराम् ।
पादोनोच्चाङ्गुष्ठनखां तदर्धतदनन्तराम् ॥ ८ ॥

त्रिपादाङ्गुलिहीनान्यां । त्रिभिः पादैः हीनं अङ्गुलं सपादाङ्गुलिद्वयमित्यर्थः । तत्परिमिता अन्या अनामिका यस्यास्ताम् । ततः तादृशतत्परां ततो अनामिकातः तादृशी पादन्यूना। तत्परा कनिष्ठाङ्गुलिर्यस्यास्ताम्। अङ्गुलिद्वयदीर्घकनिष्ठाङ्गुलमित्यर्थः । पादोनोच्चाङ्गुष्ठनखां । पादोनैकाङ्गुलोन्नताङ्गुष्ठनखाम् । तदर्धतदनन्तराम् । सार्धैकपादोच्चतदनन्तराम् । अयं भावः । अङ्गुष्ठनखस्य त्रिपादोच्चत्वम् । तदनन्तराङ्गुलिनखस्य सार्धैकपादोच्चत्वं । तदनन्तरस्य सार्धैकपादस्य चतुर्धा विभागे कृते त्रिभागोच्चत्वम् । तदनन्तरयोरपि तद्वदिति ॥ ८ ॥

क्रमशः पादहीनान्यां रक्तपादनखां शुभाम् ।
विस्तारः प्रपदस्यापि षडङ्गुल उदाहृतः ॥ ९ ॥

तदेव विशदयति । क्रमश इति । क्रमेण पादहीनान्यां । रक्ताः शोणाः पादनखाः यस्यास्ताम्। अनुक्तानामङ्गानां परिमाणमाह । विस्तार इति । प्रपदस्य पादाग्रस्य षडङ्गुलपरिमितो विस्तारः ॥ ९ ॥

अङ्गुष्ठपरिणाहस्तु चतुरङ्गुल ईरितः ।
त्र्यङ्गुलस्तु तदन्यस्या व्रीह्यर्धोनाः क्रमात् पराः ॥ १० ॥

अङ्गुष्ठपरिणाहस्तु चतुरङ्गुलः। तदन्यस्याः अङ्गुष्ठादन्यस्याः त्र्यङ्गुलपरिणाहः परिमितो विस्तारः । पराः अङ्गुलयः क्रमात् व्रीह्यर्धोनाः व्रीह्यर्धहीनत्र्यङ्गुलपरिणाहाः ॥ १० ॥

दशाङ्गुलं जङ्घमूलं तन्मध्ये त्र्यङ्गुलाधिकम् ।
सप्तदशाङ्गुलं तूर्ध्वं जानुरष्टादशाङ्गुलः ॥ ११ ॥

दशाङ्गुलं जङ्घमूलं । जङ्घयोर्मूलं दशाङ्गुलपरिणाहम् । जङ्घयोर्मध्यं त्र्यङ्गुलाधिकदशाङ्गुलपरिणाहं। ऊर्ध्वं जङ्घावसानं सप्तदशाङ्गुलपरिणाहम्। जानुप्रदेशस्तु अष्टादशाङ्गुलः ॥ ११ ॥

ऊर्वन्तोऽपि तथा ज्ञेयो मध्यं द्विर्द्वादशाङ्गुलम् ।
चतुरङ्गुलाधिकं मूलं गुह्यं सार्धचतुष्टयम् ॥ १२ ॥

ऊर्वन्तः जानूपरिभागोऽपि तथा अष्टाङ्गुलपरिणाहः । ऊरुमध्यं द्विर्द्वादशाङ्गुलं चतुर्विंशत्यङ्गुलपरिणाहं । ऊरुमूलं चतुरङ्गुलाधिकं अष्टाविंशत्यङ्गुलपरिणाहम् । गुह्यं लिङ्गं सार्धचतुष्टयं दीर्घम् ॥ १२ ॥

सार्धत्रयं परीणाहाद्वृषणं चतुरङ्गुलम् ।
सप्ताङ्गुलं परीणाहाद्वृत्तं प्रोक्तं समस्तशः ॥ १३ ॥

परिणाहस्तु सार्धत्र्यङ्गुलः । वृषणं सार्धचतुरङ्गुलदीर्घम् । परिणाहस्तु सप्ताङ्गुलम् ॥ १३ ॥

अष्टत्रिंशाङ्गुलः कट्याः परीणाह उदाहृतः ।
सुवृत्तत्वं तथा श्रोण्योः पीनत्वं च समत्वतः[1] ॥ १४ ॥

कट्याः परिणाहस्तु अष्टत्रिंशाङ्गुलः । श्रोण्याः पीनत्वं सुवृत्तत्वं च । समत्वतः समत्वेन ॥ १४ ॥

विस्तारश्च तथा कट्याः सुप्रतिष्ठितता पदोः ।
कट्याश्चैवाङ्गुलाधिक्यं नाभेरध उदाहृतम् ॥ १५ ॥

कट्याः विस्तारः पदोः सुप्रतिष्ठत्वं च विधेयमिति शेषः । नाभेरधः कट्याः कटिपरिणाहात् एकाङ्गुलाधिक्यं परिणाहस्येति शेषः ॥ १५ ॥

नाभिः सार्धाङ्गुलश्चैव गम्भीरोऽर्धाङ्गुलोऽन्ततः[2] ।
वृत्तः प्रदक्षिणश्चैव द्विचत्वारिंशदङ्गुलम् ॥ १६ ॥

नाभिः सार्धाङ्गुलगभीरः । अन्ततः अन्ते अर्धाङ्गुलिविस्तारः । वृत्तो वर्तुलः । प्रदक्षिणो दक्षिणावर्तः । द्विचत्वारिंशदङ्गुलं नाभिप्रदेशे उदरपरिणाह इत्यर्थः ॥ १६ ॥

१.पा-समस्तशः । २. उन्नतः ।

मध्यं स्तने परीणाहः षडङ्गुलमतोऽधिकः ।
एकोनविंशाङ्गुलं तदुरोविस्तारलक्षणम् ॥ १७ ॥

स्तनप्रदेशे षडङ्गुलाधिकद्विचत्वारिंशदङ्गुलपरिणाहः । उरोर्विस्तारलक्षणन्तु एकोनविंशाङ्गुलम् ॥ १७ ॥

पादोनमङ्गुलं चैव भुजाभ्यां सह सार्धकम् ।
अंसयोर्विस्तृतिश्चैव पृथगष्टाङ्गुला मता ॥ १८ ॥

पादोनाङ्गुलाधिकं[1] च पादोनविंशाङ्गुलमित्यर्थः। भुजाभ्यां सह उरोर्विस्तारलक्षणं पादोनविंशाङ्गुलम् । साधद्वयोः तर्जन्यनामिकयोः । सार्धैकोनविंशाङ्गुलमित्यर्थः[2] । अंसयोः स्कन्धयोः विस्तृतिः पृथक् पृथक् अष्टाङ्गुलपरिमिता ॥ १८ ॥

अष्टादशाङ्गुलो बाह्वोः परिणाह उदाहृतः ।
क्रमादूनं तदन्ते तु साधाष्टाङ्गुलमीरितम् ॥ २० ॥

अष्टादशाङ्गुलस्तु बाह्वोः परिणाह इत्यर्थः। अधोऽधःक्रमात् ऊनं तत् परिणाहलक्षणम् । तदन्ते बाह्वन्ते मणिबन्धप्रदेशे सार्धाष्टाङ्गुलपरिणाहः ॥ २० ॥

साङ्गुलस्तु तलः सार्धनवाङ्गुल उदाहृतः ।
समं तदुभयं ज्ञेयं तथैव तलविस्तृतिः ॥ २१ ॥

अङ्गुलिभिः सहितः साङ्गुलः तलः पाणितलः सार्धनवाङ्गुलः । तदुभयं अङ्गुलयः तलं च समं ज्ञेयम् । तलविस्तृतिरपि तथैव ज्ञेया । तलविस्तृतिः तलदैर्घ्यं अङ्गुलिदैर्घ्यं चेति त्रितयं पृथक् पृथक् सत्रिपादचतुरङ्गुलतया सममिति भावः ॥ २१ ॥

अर्धाङ्गुलोन्नता मध्या द्वयोः सार्धाङ्गुलोन्नता ।
कनिष्ठिकायास्तस्यास्तु व्रीहिमात्राधिकः परः ॥ २२ ॥

मध्या मध्याङ्गुलिः सकाशात् अर्धाङ्गुलोन्नता। तस्याः कनिष्ठिकायाः सकाशात्परः अङ्गुष्टः व्रीहिमात्राधिकः । व्रीहिमात्रादधिकः ॥ २२ ॥

सार्धत्रयपरीणाहौ मध्यज्येष्ठावुदाहृतौ ।
अन्यौ व्रीहितदर्धोनावन्या सार्धद्वयाङ्गुला ॥ २३ ॥

मध्यज्येष्ठौ मध्यमाङ्गुष्टौ । सार्धत्रयाङ्गुलपरिणाहौ । अन्यौ मध्यमायाः पूर्वापरौ सार्धव्रीहिन्यूनपरिणाहौ । मध्यमापेक्षया अन्या कनिष्ठा सार्धद्वयाङ्गुलपरिणाहः ॥२३॥

---

१. अधिकं इति न स्यादिति भाति । २. पादार्धसहितपादोनत्रिंशदङ्गुलपरिमितं इति तत्त्वकणिकायां।

पादोनान्तपरीणाहाः सर्वे ज्येष्ठां विना स्मृताः ।
वक्षोविस्तारसदृशः परिणाहो गलस्य च ॥ २४ ॥

सर्वा अङ्गुलयो ज्येष्ठमङ्गुष्टं विना पादोनपरिणाहाः । क्रमेण आतर्जन्याः पादोनपरिणाहा मध्यमा । ततश्चानामिका । ततश्च कनिष्ठिकेत्यर्थः । गलस्य कण्ठस्य परिणाहो वक्षो विस्तारेण सहितः । पादोनविंशाङ्गुल इत्यर्थः ॥ २४ ॥

ललाटकुक्षिकण्ठाश्च दीर्घरेखात्रयान्विताः ।
वृत्तो गलो बाहवश्च स्तनावङ्गुलयस्तथा ॥ २५ ॥

ललाटकुक्षिकण्ठाः दीर्घेण रेखात्रयेण युक्ताः । गलबाहवश्च स्तनौ अङ्गुलयश्च वृत्ताः वर्तुला ज्ञेयाः ॥ २५ ॥

रक्तास्तलनखाश्चैव नेत्रान्तोऽधर एव च ।
उत्तरोष्ठश्च जिह्वा च नखौ पादोनकाङ्गुलौ ॥ २६ ॥

तलः पाणितलः नखाश्च नेत्रान्तश्च अधरोष्ठ उत्तरोष्ठश्च जिह्वा च रक्ता आरक्ताः इत्यर्थः । नखौ अङ्गुष्टनखौ पादोनैकाङ्गुलिदीर्घौ ॥ २६ ॥

अर्धाङ्गुलौ तथा मध्यावन्येऽष्टांशक्रमोनकाः ॥
नासिकाया अधस्ताच्च नासिका च रराटिका ॥ २७ ॥
समा मानेन नासाया उच्चत्वेनैव मापने ।
अर्धाङ्गुलाधिकं सर्वं मुखस्य तु भविष्यति ॥ २८ ॥

मध्यौ तर्जनीमध्यमयोर्नखौ अर्धाङ्गुलदीर्घौ । अन्ये अन्याङ्गुलिनखास्तु अष्टांशक्रमोनकाः । अष्टमांशेन क्रमतो न्यूनाः मध्यमनखापेक्षया अनामिकनखोऽष्टमांशेन न्यूनः । ततः कनिष्ठिकानख इति । नासिकाया अधस्तात् आचुबुकान्तं नासिका च रराटिका ललाटं च एते समानमानाः चुबुकमारभ्य नासाग्रे ललाटान्तपर्यन्तं मापने क्रियमाणे नासायां उच्चतया सर्वमुखस्य अर्धाङ्गुलोच्चत्वमित्यर्थः ॥ २७-२८ ॥

चतुरङ्गुलं तथैवास्यं सार्धव्रीह्यधरं स्मृतम् ।
उत्तरं व्रीहिमात्रं तु तदूर्ध्वं चाधरोपमम् ॥ २९ ॥

आस्यं मुखं च चतुरङ्गुलं अधरं अधरोष्टः सार्धव्रीहिः सार्धैकव्रीहिपरिमाणः । उत्तरं उत्तरोष्टः व्रीहिमात्रपरिमाणः । तदूर्ध्वं उत्तरोष्टादूर्ध्वं नासिकापर्यन्तं अधरोपमम् । सार्धैकव्रीहि परिमितम् ॥ २९ ॥

साधाङ्गुलमधः प्रोक्तमधरादध एव च ।
आस्यपार्श्वद्वयं प्रोक्तमाकर्णात्तु षडङ्गुलम् ॥ ३० ॥

अधरादधोभागः सार्धैकाङ्गुलः । अत्रेदं तात्पर्यं । नवाङ्गुलललसन्मुखमित्युक्तम् । तत्र नासाधोभागः त्र्यङ्गुलः । नासा च त्र्यङ्गुली ललाटं च त्र्यङ्गुलमिति । नवाङ्गुलित्वम् । तत्रायं विशेषः । उत्तरोष्टादूर्ध्वभागस्य अधरोष्टस्य एकाङ्गुलत्वम् । व्रीहित्रयस्य एकाङ्गुलित्वात् । दीर्घाश्च कलमास्तिस्र इति वक्ष्यति । अधरोष्टाधरभागस्य सार्धैकाङ्गुलित्वं उत्तरोष्टस्य व्रीहिमात्रत्वं । एवं सति अर्धन्यूनत्र्यङ्गुलत्वं सिद्धम् । अर्धव्रीहिमात्रं तु मन्दस्मितमिति तात्पर्यम् । आस्यस्य मुखस्य पार्श्वद्वयं कर्णपर्यन्तं षडङ्गुलम् ॥ ३० ॥

सप्ताङ्गुलं नासिकायाः पार्श्वमाकर्णतः स्मृतम् ।
सपादाङ्गुलमुच्चा च नासिका परिकीर्तिता ॥ ३१ ॥

नासिकायाः पार्श्वं आकर्णात् सप्ताङ्गुलम् ॥ ३१ ॥

अर्धाङ्गुले पुटे तस्याः मध्यं च समुदाहृतम् ।
नासिका व्रीहिविस्तारा चक्षुषी चाङ्गुलत्रये ॥ ३२ ॥

नासिका च व्रीहिविस्तारा । चक्षुषी च अङ्गुलित्रयदीर्घे ॥ ३२ ॥

अङ्गुलं चैव विस्तीर्णे फुल्लेऽर्धं च तदन्यथा ।
चतुरङ्गुलौ भ्रुवौ चैव तथाऽर्धाङ्गुलविस्तृतौ ॥ ३३ ॥
असंहतौ च निबिडौ तथा पक्ष्म सुनीलकम् ।
कर्णौ च त्र्यङ्गुलं सार्धद्वयविस्तारसंयुतौ ॥ ३४ ॥

फुल्ले विकसिते अङ्गुलविस्तीर्णे । अन्यथा अफुल्ले चेत् दीर्घाङ्गुलविस्तीर्णे । भ्रुवौ च चतुरङ्गुलौ चतुरङ्गुलदीर्घौ । तथा अर्धाङ्गुलविस्तारे असंहतौ मध्येऽविच्छन्नौ निबिडौ घनौ च । भ्रूशब्दस्य पुंस्त्वमार्षम् । पक्ष्म सुनीलकम् । सुतरां नीलमित्यर्थः । कर्णौ च त्र्यङ्गुलदीर्घौ । सार्धाङ्गुलद्वयविस्तीर्णौ ॥ ३३-३४ ॥

सकुण्डलं तावदेव विवरं सम्प्रकीर्तितम् ।
तथा व्यङ्गुलविस्तारो लताभ्यां सह कथ्यते ॥ ३५ ॥

सकुण्डलं विवरं कर्णे कर्णच्छिद्रमपि तावदेव । कर्णलताभ्यां सह व्यङ्गुलविस्तारौ ॥ ३५ ॥

कर्णपूरयुतौ कर्णावुत्पलाभ्यां च संयुतौ ।
नीलालकसहस्रेण युक्तं तन्मुखपङ्कजम् ॥ ३६ ॥

कर्णौ कर्णपूराभ्यां युतौ । उत्पलाभ्यां च युतौ ज्ञेयौ । मुखपङ्कजं च नीलानां अलकानां सहस्रेण संयुतम् ॥ ३६ ॥

ललाटं सुविशालं च तथा सार्धनवाङ्गुलम् ।
विस्तारो मूर्ध्नि वृत्तं च शिरः छत्राकृति स्मृतम् ॥ ३७ ॥

ललाटं सुविशालं च। सार्धनवाङ्गुलविस्तृतं शिरश्च। सुशोभनं विशालं छत्राकृतिवृत्तं च । अथवा मूर्ध्नि सार्धनवाङ्गुलपरिणामेन विस्तार इति योज्यम् ॥ ३७ ॥

दीर्घाश्च कुञ्चिताग्राश्च नीलाः केशा हरेर्मताः ।
मुखमानेन चैवोच्चं किरीटं केशवस्य हि ॥ ३८ ॥

श्रीहरेः केशाः नीलाः श्यामाः कुञ्चिताग्राश्च । मुखस्य मानेन नवाङ्गुलपरिमाणेन केशवस्य किरीटं मुकुटं ज्ञेयम् ॥ ३८ ॥

कुण्डले मकराकारे वक्षश्चैव सकौस्तुभम् ।
सश्रीवत्सं दक्षिणतः पीनं तुङ्गमुदाहृतम् ॥ ३९ ॥

कुण्डले च मकरस्येवाकारो ययोस्तादृशी । वक्षःस्थलं च कौस्तुभेन युतम् । दक्षिणतो पीनता । पीनं तुङ्गं । श्रीवत्साख्यचिह्नेन युतम् ॥ ३९ ॥

हारग्रैवेयसहितमुपवीतयुतं तथा ।
बाहवश्च सकेयूरकङ्कणाङ्गदमुद्रिकाः ॥ ४० ॥

हारैः मुक्तामयैः । ग्रैवेयैः ग्रीवाभरणैश्च सहितं । यज्ञोपवीतयुतं ज्ञेयम् । बाहवश्च केयूरकैः अङ्गदैः कङ्कणैः मुद्रिकाभिश्च सहिता ज्ञेयाः । केयूराङ्गदयोरवान्तरभेदात् भिन्नत्वेनोपादानं ॥ ४० ॥

समध्यबन्धं मध्यं च नितम्बे पीतमम्बरम् ।
काञ्चीगुणश्च पदयोर्नूपुरे चातिसुस्वने ॥ ४१ ॥

मध्यबन्धेन कटिबन्धेन सहितं । मध्यं कटिभागः । नितम्बे पीतमम्बरं वस्त्रं च । काञ्चीगुणश्च पदयोः सुस्वरे नूपुरे च ॥ ४१ ॥

अङ्गुलीयानि च पदोः कृतिभिः साधु कारयेत् ।
सोत्तरीयं च चक्राद्यैरायुधैश्च समन्वितम् ॥ ४२ ॥

पदोरङ्गुलीयानि च कृतिभिः कुशलिभिः शिल्पिभिः साधु कारयेत् । सोत्तरीयं उत्तरीयवस्त्रवन्तं चक्राद्यायुधैः समन्वितम् ॥ ४२ ॥

अनुन्नतैरविरलैर्दन्तैर्युक्तं च सुस्मितम् ।
[१]समदृष्टिं महाकायं श्लक्ष्णं[२] चैव मनोहरम् ।। ४३ ।।

अनुन्नतैरविरलैर्दन्तैर्युक्तम् । सुस्मितं । समे दृष्टी लोचने यस्य सः । महान् अनुरूपः कायो यस्य श्लक्ष्णं स्निग्धं मनोहरदृष्टिमात्रेण चित्तग्राहिणं कृतिभिः कारयेदिति पूर्वेण सम्बन्धः । विशेषतस्त्विदमाचार्यैर्ध्यानार्थमुक्तमिति वेदितव्यम् ।। ४३ ।।

प्रतिमार्थं व्रजन्पञ्चध्वनिभिर्मङ्गलैर्युतः ।
गत्वा शुचिस्थलं तत्र शिलां चैव परीक्षयेत् ।। ४४ ।।

एवं मूर्तिलक्षणमभिधाय इदानीं स्थानादिपरीक्षामाह । प्रतिमार्थमिति । प्रतिमानिर्माणं कर्तुमिच्छुः पञ्चध्वनिवाद्यैः पुण्ये अहनि शुचिस्थलं गत्वा तत्र शिलां परीक्षयेत् ।। ४४ ।।

ध्वनिभेदेन विज्ञाय शिलां गर्भवतीं त्यजेत् ।
मूलमन्त्रं जपन् विष्णुं ध्यायंस्तिष्ठेदुपोषितः ।। ४५ ।।

शिल्पज्ञैः ध्वनिभेदेन ध्वनिविशेषेण गर्भवतीं शिलां परित्यजेत् । तत्र शिलाग्रहणार्थं उपोषितो मूलमन्त्रं जपन् तिष्ठेत् ।। ४५ ।।

वार्क्षीं चेद्यज्ञवृक्षस्य सारेणैव तु कारयेत् ।
बलिदानं च संक्षेपविधानेनैव कथ्यते ।। ४६ ।।

वृक्षमयी वार्क्षी चेत् प्रतिमाप्रतिष्ठापयिषिता तदा यज्ञवृक्षस्य खदिरौदुम्बर-शमीपालाशादेः सारेण निर्मापयेत् । बलिदानं चात्र सङ्क्षेपादेव कथ्यते ।। ४६ ।।

अस्य संक्षेपशास्त्रत्वान्न विस्तरविरोधिता ।
दत्वोपहारं हरये तद्भूतेभ्यो बलिं हरेत् ।। ४७ ।।
प्राच्येभ्यो विष्णुभूतेभ्य इत्याद्यखिलदिक्षु च ।
आदाय विष्णुभूतेभ्यो [३]लोकपेभ्यस्तथा हरेः ।। ४८ ।।
अनुज्ञामुद्धरेद्वृक्षं शिलां वा प्रतिमाकृते ।
[४]प्रतिमापिण्डिकां पीठं शिलाभिस्तु त्रिजातिभिः ।। ४९ ।।

नन ग्रन्थान्तरेषु विस्तारोऽप्यस्तीति चेत् । अस्तु का क्षतिः अस्य सङ्क्षेपशास्त्रत्वात् । आदौ हरये उपहारं नैवेद्यं दत्वा तद्भूतेभ्यो बलिं हरेत् ।। *प्राञ्चेभ्यो विष्णुभूतेभ्यो

१. पा-समदृष्ट्युतं कार्यं । २.स्निग्धम् ।३.पा-लाकेशेभ्यस्तथा । ४.पा- प्रतिमां पिण्डिकां ।*प्राच्येभ्यः

अयं न मम इति प्राच्यां । आग्नेयेभ्यो विष्णुभूतेभ्यो बलिं इत्यादिक्रमेण अष्टदिक्षु बलीन् दत्वा, तेभ्यो आज्ञामादाय लोकपालेभ्यश्च हरेश्च आज्ञां गृहीत्वा वृक्षं शिलां वा प्रतिमानिमित्तमुद्धरेत् ।स्त्रीपुंनपुंसकभेदेन त्रिविधाभिः प्रतिमापिण्डिकां प्रतिमाधारभूतां पीठिकां कारयेदिति शेषः ।। ४७-४९ ।।

स्वरस्थूलत्वभेदेन पुंस्त्र्याद्या जातिभिः शिलाः ।
पुंशिलां प्रतिमार्थं तु स्त्रीशिलां पीठक्लृप्तये ।। ५० ।।

स्थूलस्वरा पुंशिला सूक्ष्मस्वरा स्त्रीशिला समस्वरा क्लीबेति शिल्पशास्त्रोक्तत्वात् । प्रतिमार्थं पुंशिला ग्राह्या । पीठार्थं स्त्रीशिला ।। ५० ।।

वेदमङ्गलघोषेण वाद्यैस्तत्प्रतिमां हरेत् ।
प्रागुदक्प्रवणे देशे कुर्याद्देवालयं सुधीः ।। ५१ ।।

तत्र शुभे दिने वेदमङ्गलघोषेण पञ्चवाद्यैश्च प्रतिमां हरेत् । निर्मितां प्रतिमां स्थापनार्थं नयेदित्यन्वयः । देवालयनिर्माणमाह । प्रागुदक्प्रवण इति । प्राक्प्रवणे प्राचीने ।। ५१ ।।

[1]समावृत्तं दक्षिणतः पश्चाद्गिर्यग्र एव च ।
मध्ये वा ग्रामपुरयोर्विशाले सुशुचौ तथा ।। ५२ ।।
ऐशानीं दिशमेकां तु विनोदकविवर्जिते ।
जलाशयस्य मध्ये वा शिलावृक्षादिवर्जिते ।। ५३ ।।
श्मशानादिकदेशानां विदूरे सुमनोहरे ।
किष्कुद्वादशतोऽनूनं कुर्याद्देवालयस्थलम् ।। ५४ ।।

किम्भूतं दक्षिणतः पश्चाच्च समावृत्तम् । अतः पूर्वद्वारं उत्तरद्वारं वा कारयेदित्यर्थः । गिर्यग्रे पर्वतस्योपरि । ग्रामपुरयोर्मध्ये शुचौ पवित्रस्थले । एकां ऐशानीं दिशं विना नगरग्रामयोः ऐशान्यां न कारयेदित्यर्थः । उदकविवर्जिते यत्र चातुर्मास्यादौ जलं नैकीभूय तिष्ठति । जलाशयस्य मध्ये वा शिलावृक्षादिवर्जिते देशे स्मशानाद्यपवित्रदेशादिदूर । किष्कुद्वादशतः हस्तद्वादशतोऽनूनं देवालयस्थलं कुर्यात् । किष्कुर्हस्ते वितस्तौ चेति कोशात् ।। ५२-५४ ।।

---

१. पा-रामावृते ।

द्विगुणं चतुर्गुणं वापि शतकिष्कुप्रमाणकम् ।
कृत्वा भूशोधनं सम्यक् सार्धपुंमानतस्त्वधः ॥ ५५ ॥
केशाङ्गारास्थिवल्मीकलोष्टाश्मादिविवर्जिते ।
हरिं तत्रापि सम्पूज्य बलिं दत्वा च पूर्ववत् ॥ ५६ ॥

द्विगुणं चतुर्विंशतिहस्तं चतुर्गुणं अष्टचत्वारिंशद्धस्तपरिमितं शतहस्तपरिमितं वा कारयेत् । सार्धपुरुषप्रमाणतोऽधस्तात् भूशोधनं कृत्वा देवागारस्यारम्यसमये च पूर्ववत् हरिं सम्पूज्य तद्भूतेभ्यो बलिं च दद्यात् ॥ ५५-५६ ॥

मृद्दारुशैलैर्लोहैर्वा कुर्याद्देवालयं दृढम् ।
दीर्घास्तु कलमास्तिस्रस्तिर्यगष्टयवोदराः ॥ ५७ ॥
अङ्गुल्या मध्यरेखायाः समा लक्षणतः स्मृताः ।
स्वाङ्गुल्या मध्यरेखा तु प्रतिमादिषु लक्षणम् ॥ ५८ ॥

देवालयप्रकृतिद्रव्याण्याह । मृद्दारुशैलैरिति । मृत्तिकया दारुभिः काष्टैः शैलैरिति । मृत्तिकया दारुभिः काष्टैः शैलैः शिलाभिः लोहैः ताम्रादिभिर्वा दृढं अभेद्यं देवालयं कुर्यात् । अङ्गुलिलक्षणमाह । दीर्घेति । दीर्घस्थिताः तिस्रः कलमाः व्रीहयः तिर्यक्स्थिताः । अष्टयवोदराः वा । अङ्गुल्या अङ्गुष्टस्य मध्ये रेखायाः लक्षणतः प्रमाणतः समा मताः । प्रतिमालक्षणे नवाङ्गुललसन्मुखमित्यादौ न । दीर्घस्थकलमा न वा तिर्यगष्टयवोदरैरङ्गुलिवलयः । किं तर्हि ह्रस्वमध्योच्चभेदभिन्नानां प्रतिमानां अङ्गुलिं परिकल्प्य तन्मानं रचयेदित्याह । स्वाङ्गुल्येति । स्वशब्देनात्र प्रतिमा गृह्यते । तस्य समभिव्याहृतपरत्वात् । ह्रस्वादिप्रतिमाङ्गुल्या मध्यरेखा प्रतिमादिषु प्रतिमाद्यङ्गेषु लक्षणं ज्ञापकम् ॥ ५७-५८ ॥

ह्रस्वमध्योच्चभेदेन तत्तन्मानं समस्तशः ।
प्रादेशहस्तपुरुषमानं सामान्यलक्षणम् ॥ ५९ ॥

प्रादेशमात्रा ह्रस्वा । हस्तमात्रा मध्यमा । ततोऽधिका पुरुषमानान्ता उच्चा ॥५९॥

प्रतिमाध्यर्ध्यकं द्वारमूर्ध्वमर्द्धं च विस्तृतिः ।
प्रतिमार्धप्रमाणेन पीठस्योच्चत्वमिष्यते ॥ ६० ॥

प्रतिमाध्यर्धकं उच्चप्रतिमाविषयमेतत् । ऊर्ध्वं प्रतिमाद्यर्धकं तदर्धं च विस्तृतिः विस्तारः कर्तव्यः । प्रतिमार्धप्रमाणेन पीठासनस्योच्चत्वम् ॥ ६० ॥

उन्नतिः पिण्डिकायास्तु चतुरङ्गुलमानतः ।
त्र्यङ्गुलं द्व्यङ्गुलं वाऽपि गृहान्तःप्रतिमासमम् ॥ ६१ ॥
उच्चं पर्यक् च क्रमश उच्चत्वं मध्यतः स्मृतम् ।
तावदुच्चं बहिश्चैव यद्येकशिखरं भवेत् ॥ ६२ ॥
अर्धोच्चमथवाऽपि स्यादधस्तात् प्रतिमोन्नतम् ।
ततो द्विगुणमानं वा सार्धप्रतिममेव वा ॥ ६३ ॥
शिखरान्तरे तु प्रतिमामानं तद्बलमुच्यते ।
तत्त्रिपादं तदर्धं वा तदध्यर्धमथापि वा ॥ ६४ ॥

पिण्डिकायाः प्रतिमाधारभूतायाः उन्नतिः चतुरङ्गुला त्र्यङ्गुला द्व्यङ्गुला वा भवेदित्यर्थ । गृहस्य मूलमन्दिरस्य प्रान्तात् भित्तेरुपरि प्रतिमाप्रमाणोच्चत्वम् । एवं पर्यक् परितश्च क्रमेण उच्चत्वम् । बहिरपि तावदेवोच्चत्वं यद्येकशिखरं मन्दिरं । अनेकशिखरत्वे तु नायं नियम इति । एकशिखरमन्दिरस्य गृहान्तादुच्चत्वेन विकल्पमाह । अर्धोच्चमिति । प्रतिमार्धोच्चं बहिः । अधस्तात् मन्दिरान्तभागे प्रतिमोन्नतं, ततो द्विगुणमानं वा । सार्धप्रतिमोन्नतं वा ॥ ६१-६४ ॥

वर्तुलं पद्मसदृशं हस्तिपृष्ठसमं तथा ।
चतुरस्रं चाष्टकोणं विमानं परिकीर्तितम् ॥ ६५ ॥
प्रतिमाया दशगुणं विंशद्गुणमथापि वा ।
वर्तुलं शिखरं त्वेकं किरीटकृतिमद्भवेत् ॥ ६६ ॥

वर्तुलं पद्माकारं वा हस्तिपृष्ठाकारं वा मन्दिरं कारयेदिति शेषः । विमानपरिमाणमाह ।चतुरस्रमिति । चतुष्कोणं अष्टकोणं वा विमानं । प्रतिमायाः परिमाणात् दशगुणपरिमाणं विंशद्गुणपरिमाणं वा । अनेकशिखरपक्षेऽप्येकं मुख्यं शिखरं किरीटाकृति वर्तुलं च भवेत् तदिति ॥ ६५-६६ ॥

सभयाऽपि समेतं वा पृथक्सभमथापि वा ।
द्विसभं त्रिसभं वापि सगोपुरमथापि वा ॥ ६७ ॥
प्राकारवृत्तयुक्तं वा सप्तप्राकारमेव वा ।
समवृत्तं किष्कुमात्रं बहिर्वा चतुरस्रकम् ॥ ६८ ॥

सभयेति । यत्र जनाः स्थिताः सन्तो देवमवलोकयन्ति सा सभा । तया

मन्दिरसंलग्नया समेतं। पृथक् सभं। मन्दिरासंलग्नसभां वा। द्वे सभे यस्य तत् द्विसभं। अथवा त्रिसभम्। गोपुरेण बहिर्द्वारेणोपेतं। प्राकारवृत्तयुक्तम्। वृत्तो वर्तुलो यः प्रकारः तेन युक्तम्। छान्दसो वृत्तशब्दस्य पूर्वनिपातः। यद्वा प्राकारस्य यद्वृत्तं वर्तनमवस्थितिः चतुरस्रादिकता तया युक्तम्। सप्तप्राकारयुतं वा। प्राकारं विशिनष्टि समवृत्तमिति। समं च तत् वृत्तं च। किष्कु हस्तद्वयं तत्परिमितं। चतुरस्रं चतुष्कोणं ॥ ६७-६८ ॥

ततः परं किष्कुमात्रं सभाया अन्तरं यदि।
ततस्तावत्तृतीयायाः सार्धमेव ह्युदाहृतम् ॥ ६९ ॥

पृथक् सभात्वे विशेषमाह। तत इति। मन्दिरात्परं किष्कुमात्रं सभाया अन्तरं द्वितीयादि सभानां तु सार्धकिष्कुमात्रमन्तरं उदाहृतम् ॥ ६९ ॥

पूजयेद्वास्तुपुरुषस्योपरिष्ठांस्तु सर्वदा।
देवान् ब्रह्मादिकान् वास्तुर्वराहस्य हरेः सुतः ॥ ७१ ॥
पातितो दैवतैर्भूमौ चतुरस्राकृतिः स्थितः।
कृत्वाऽष्टकाष्टकोष्ठानि मध्ये ब्रह्मा चतुष्टये ॥ ७२ ॥
पूज्यो द्वये द्वये शक्रो यमो वरुण एव च।
सोमश्च पूज्याः कोणेषु वह्न्याद्याः कोणदेवताः ॥ ७३ ॥
पुनस्त्रये त्रये कामं धातारं सविधातृकम्।
स्कन्दं च पूजयेत्कोणे सूर्यं चैव विनायकम् ॥ ७४ ॥
कालं कुबेरं च बहिः प्रत्येकं दिक्षु पूजयेत्।
[1]हरिं [2]हरं गभीरं च गाहनं [3]गहनं गुहम् ॥ ७५ ॥
[4]भानुमङ्गारकं चैव पूर्वस्यां दिशि पूजयेत्।
दारुणं विदरिं द्योतं प्रद्योतं द्योतनं हरिम् ॥ ७६ ॥
मृत्युं शनैश्चरं चैव दक्षिणस्यां प्रपूजयेत्।
पुष्करं क्षरणं क्षारं विक्षणं क्षोभणं क्षरम् ॥ ७७ ॥
चार्वङ्गं भार्गवं चैव पश्चिमस्यां प्रपूजयेत्।
चारं विचारं प्रचरं सञ्चारं चारणं चरम् ॥ ७८ ॥

१. पा- हारं। २. पा-हरिं। ३. पा- गेहनं। ४. पा- भात

बृहस्पतिं बुधं चैवाप्युत्तरस्यां प्रपूजयेत् ।
एवमेव विमानस्य कृतेः प्रागपि पूजयेत् ॥ ७९ ॥

वास्तुदेवान् वक्तुं चतुःषष्टिपदं वास्तुमण्डलमाह । कृत्वेति । अष्टकस्याष्टौ चतुःषष्टिकोष्ठानि । वह्न्याद्याः वह्निनिर्ऋतिवाय्वीशानाः कोणेषु पूज्याः । शेषं निगदव्याख्यानं ॥ ७१-७९ ॥

[1]सप्तवर्णमयं साधु कारयेन्मण्टपं तथा ।
सप्तहस्तं द्विषड्ढस्तं अथवा द्विगुणं ततः ॥ ८० ॥

सप्तवर्णमयमिति । सप्तवर्णो वृक्षविशेषः । तन्मयं मण्डपं कारयेत् । सप्तहस्तत्वादिभेदाः शक्त्यपेक्षाः ॥ ८० ॥

चतुर्गुणं वा सम्यक् तु चतुरस्रं [2]सभाजिरम् ।
अन्यच्च मण्टपं दीर्घं पञ्चहस्तं तु कारयेत् ॥ ८१ ॥
त्रिचतुष्कोष्ठकं तत्र मध्ये प्रागायतं शुभम् ।
कारयेन्मण्डलं साधु हस्तमात्रं सुविस्तृतम् ॥ ८२ ॥
तत्र द्वादशपात्राणि स्थापयेत्पालिकादिकम् ।
पालिकास्तु चतुर्विंशत्यङ्गुलोच्छ्रयसंयुताः ॥ ८३ ॥
अष्टादशाङ्गुलाश्चैव तथा पञ्चमुखा अपि[3] ।
द्वादशाङ्गुलकाश्चैव शरावाः पश्चिमानुगाः ॥ ८४ ॥

सहाजिरं अजिरमङ्गणं तत्सहितं । अन्यच्चान्यदपि पञ्चहस्तमितं मण्डलार्थं मण्डपं कारयेत् । तत्र द्वितीयमण्टपे द्वादशकोष्ठकं मण्डलं लिखेत् । हस्तमात्रं सुविस्तृतम् । तत्र कोष्ठेषु पालिकादि द्वादशपात्राणि स्थापयेत् । पालिकालक्षणमाह । पालिकास्त्विति । पालिकाः चतुर्विंशत्यङ्गुलोच्छ्रिताः विस्तृतमुखसप्तधान्याङ्कुरपात्रविशेषाः । एवं अष्टादशाङ्गुलोच्छ्रया पञ्चमुखाः कुम्भाः । द्वादशाङ्गुलोच्छ्रयाः शरावाश्च कर्तव्याः । तत्र चतस्रः पालिकाः । चत्वारः पञ्चमुखाः । चत्वारः शरावाः द्वादशकोष्ठेषु स्थापनीयाः ॥ ८१-८४ ॥

---

१. पा- सप्तपर्णमयं । २.सहाजिरम् । ३.इति ।

तत्र विष्णुं चतुर्मूर्तिं पूजयेद्भक्तितस्त्रिशः ।
सप्तधान्यानि तेष्वेव पूरयेदङ्कुरार्थतः ॥ ८५ ॥

तत्र मण्डले चतुर्मूर्तिं वासुदेवप्रद्युम्नसङ्कर्षणानिरुद्धरूपं त्रिशो वारत्रयं द्वादशस्वपि कोष्ठेषु पूजयेदित्यर्थः ॥ ८५ ॥

तत्र नित्यं बलिं दद्याद्विष्णवे दशरात्रकम् ।
ब्रह्मशंकरगीर्वाणपितृगन्धर्वयक्षकैः ॥ ८६ ॥
भूतैश्च पायसेनैव तथा पद्माक्षतेन च ।
अन्नापूपेन पुष्पान्नैरन्नलाजाक्षतैरपि ॥
सक्तुभिश्च क्रमेणैव [1]देवांस्तान् पायसेन वा ॥ ८७ ॥

प्रत्यहं बलिं दद्यात् । ब्रह्मरुद्रदेवपितृगन्धर्वयक्षैः सह तेभ्योऽपि बलीन् दद्यात् । भूतान् विष्णुभूतान् द्वितीया चतुर्थ्यर्थे । भूतेभ्यश्चेत्यर्थः । बलिद्रव्याण्याह । पायसेनैवेति । पायसेन विष्णवे । पद्माक्षतेन ब्रह्मशङ्करगीर्वाणेभ्यः । अन्नापूपेन पितृभ्यः पुष्पान्नैः गन्धर्वेभ्यः । अन्नलाजाक्षतैः यक्षेभ्यः । सक्तुभिः भूतेभ्यः इति क्रमेण बलीन् दद्यात् । अथवा विष्णुब्रह्मरुद्रदेवेभ्यः पायसेन । पित्रादिभ्य उक्तद्रव्यैः ॥ ८६-८७ ॥

तदैव प्रतिमायाश्च कारयेदधिवासनम् ।
पञ्चगव्ये सप्तरात्रं क्षिप्त्वा पुरुषसूक्ततः ॥ ८८ ॥

तदैव यस्मिन् दिवसे पालिकादिस्थापनं तदैव प्रतिमाया अपि अधिवासनं कुर्यात् । पञ्चगव्ये सप्तरात्रं पुरुषसूक्तेन प्रतिमां स्थापयेत् ॥ ८८ ॥

वेदांश्च चतुरः सम्यक् पारयेयुर्द्विजोत्तमाः ।
प्राच्यादिद्वारगौ द्वौ द्वावेकैकं तु दशावराः ॥
यथालब्धं यथावित्तं अथवा विष्णुतत्पराः ॥ ८९ ॥

तेषु च दिनेषु द्विजोत्तमाः ऋगादिवेदान् पारयेयुः पठेयुः । द्वौ द्वौ जापकौ प्रतिद्वारं मण्डपस्य एकैकं वेदं पठेयुः । एवञ्च अष्टौ जापकाः षोडशर्त्विजः आचार्यश्चेति पञ्चविंशतिः । द्विजोत्तमाः यथालब्धं यावन्तो योग्या लभ्यन्ते तावन्तः यथावित्तं यथाशक्तिर्वा ब्राह्मणा विष्णुभक्ताः । दशावराः । दशा अवरा पक्षे येषां ते । अत्यल्पे चेत् दश भवेयुः ॥ ८९ ॥

---
१. पा- देवान्तं ।

त्रयोदशात्र कुण्डानि परितः कारयेद्बुधः ।
उक्तलक्षणयुक्तानि प्रधानं त्वग्निकोणके ॥
साक्षात्तु कोणगाद्धस्तमात्रमन्तरतः सुधीः ॥ ९० ॥
आज्याहुतीस्तेषु कार्याः प्रत्येकं लक्षसङ्ख्यकाः ।
प्रत्येकमयुतं वाऽपि प्रधाने लक्षसङ्ख्यकम् ॥ ९१ ॥
अर्धं तदर्धमथवा मूलमन्त्रेण मन्त्रवित् ।
पञ्चविंशतित्वार्थे प्रधाने जुहुयात् पुरः ॥ ९२ ॥

अत्र त्रयोदशकुण्डानि कारयेत् । उक्तमेखलयोन्यादिलक्षणोपेतानि । प्रतिदिशं चत्वारि चत्वारि । प्रधानकुण्डमाग्नेयकोणे कारयेत् इति । कोणगात् प्रधानकुण्डात् प्राच्यकुण्डानां याम्यकुण्डानां च हस्तमात्रान्तरं यथा भवति तथा कारयेदिति । तेषु कुण्डेषु प्रत्येकं लक्षं अयुतं वा आज्याहुतीः कारयेदिति । पञ्चविंशतितत्वाभिमानिदेवतार्थे ॥ ९०-९२ ॥

प्रत्येकं तु सहस्रं वा प्रत्येकं शतमेव वा ।
शतं पुरुषसूक्तेन गायत्र्या च सहस्रकम् ॥
कृत्वा जलाधिवासं च पूर्वं वा पञ्चगव्यतः ॥ ९३ ॥

प्रधानकुण्डे प्रत्येकं सहस्रं शतं वा जुहुयात् । गायत्र्या सहस्रं जुहुयात् । पञ्चगव्याधिवासनात्पूर्वं जलाधिवासं कृत्वा होमादि कुर्यादिति शेषः ॥ ९३ ॥

चक्राब्जं भद्रकं वापि मण्टपे मण्डलं शुभम् ।
पद्मं वृत्तत्रयं चक्रं राशयो वीथिकास्तथा ॥ ९४ ॥
शोभोपशोभिकाश्चैव चक्राब्जस्य तु लक्षणम् ।
चतुरस्रं विना चक्रं विशेषो भद्रके स्मृतः ॥ ९५ ॥

मण्टपे चक्राब्जं भद्रकं सर्वतोभद्रं मण्डलं लिखेत् । चक्राब्जलक्षणमाह । वृत्तमिति । पद्ममध्ये परितो वृत्तत्रयं चक्रं । राशयः वीथिकाः शोभोपशोभिकाश्च बहिः चतुस्रं भद्रलक्षणं । तच्चक्रं विना । शोभोपशोभादिकं तु तत्राप्यस्ति ॥ ९४-९५ ॥

सहस्रमर्धं पादं वा कलशांस्तत्र पूजयेत् ।
शतं तदर्धं पादं वा वित्ताभावे निगद्यते ॥ ९६ ॥

कलशेषु संख्यानियममाह । सहस्रमिति । अर्धं पञ्चशतानि पादं सार्धशतद्वयम् । तं वित्ताभावे । तदर्धं वा कलशाः कार्याः ॥ ९६ ॥

क्काथेन क्षीरिवृक्षाणां तथा पञ्चामृतैरपि ।
पञ्चगव्येन शुद्धेन जलेन च पृथक् पृथक् ॥
पूरयेत्कलशान्मध्यं शुद्धोदेनैव पूरयेत् ॥ ९७ ॥
ब्राह्मस्यैव चतुर्दिक्षु गन्धोदानां चतुष्टयम् ॥ ९८ ॥
चतुदलश्वेतपद्मचतुष्के मण्डलस्थिते ।
पूर्वादिक्रमयोगेन रसक्काथशुभोदकान् ॥ ९९ ॥
गन्धांश्च स्थापयेत्पञ्चगव्यं शुद्धान्तरे न्यसेत् ।
पृथक् चतुर्दलं पद्मं रक्तं कृत्वाऽल्पकं सुधीः ॥ १०० ॥

क्षीरिवृक्षाणां औदुम्बरादीनां क्काथेन पञ्चामृतैः पृथक् पृथक् पञ्चगव्येन एकीकृतपञ्चगव्यैः शुद्धजलेन च कलशान् पूरयेत् । मध्यं मध्यकलशं । ब्राह्मस्य ब्रह्मकलशस्य चतुर्दिक्षु गन्धोदकयुक्तानां कलशानां चतुष्टयं स्थापयेदित्यर्थः । चतुर्दलश्वेतपद्मचतुष्टये सर्वकलशस्य चतुर्दिशं विरचिते रसक्काथशुभोदगन्धकलशान् स्थापयेत् । गन्धांश्च ॥ उशीरं कुङ्कुमं मांसं कुलं मलयजोऽगुरुः । [२]ह्रीबेरं च मुरं चेति गन्धानष्टौ प्रचक्षते । बृहन्तं कलशं स्थापयेत् । किं कृत्वा पृथक् । अल्पकं रक्तवर्णं चतुर्दलं पद्मकं कृत्वा पञ्चद्रव्यकलशस्थापनाय पञ्चगव्यकलशं शुद्धान्तरे शुद्धोदकसर्वकलशयोर्मध्ये निधापयेत् ॥ ९७-१०० ॥

पञ्चाशत्वे तु गन्धोदं सर्वमध्ये निधापयेत् ।
ब्राह्मस्य पुरतस्त्वेकं शार्वं संस्थापयेद्बृहत् ॥ १०१ ॥

पञ्चाशत्वे कलशानां पञ्चाशत्वपक्षे । गन्धोदककलशं सर्वब्रह्मकलशयोर्मध्ये निधापयेत् । ब्राह्मस्य कलशस्य पुरतः पूर्वभागे बृहन्तं कलशं स्थापयेत् ॥ १०१ ॥

अष्टदिक्ष्वष्टपद्मेषु पञ्चकं पञ्चकं न्यसेत् ।
अनेन क्रमयोगेन कलशा अखिला अपि ॥ १०२ ॥
तत्तद्द्रव्यमयास्तत्र तत्र स्थाप्यास्तु बाह्यतः ।
तदैवाङ्कुरपात्राणि परितस्तत्र विन्यसेत् ॥ १०३ ॥

तस्य परितोऽष्टदिक्षु पद्मं लिखित्वा तेषु पञ्चकलशान् स्थापयेत् । अनेनैव क्रमेण

१.पा- चतुर्दले सिते पद्मे चतुष्के मण्डले स्थिते। २.हीरबेरं।

सर्वे कलशाः तत्तद्द्रव्यपूर्णा बाह्यप्रदेशे परितः स्थापनीयाः । अङ्कुरपात्राणि परितः कलशेभ्यो बहिर्विन्यसेत् ॥ १०२-१०३ ॥

कौशोदकं[1] च कार्पूरं कौङ्कुमं चान्दनं तथा ।
तुहिनोदं [2]हीरबेरं औशीरं कौष्ठसार्षपम् ॥ १०४ ॥

विशेषकलशानाह । कौशोदमिति । कुशोदकपूर्णं । कार्पूरं कर्पूरोदकभृतं । कौङ्कुमं कुङ्कुमोदकयुक्तं । चान्दनं चन्दनजलपूर्णं । तुहिनोदं शीतलजलयुक्तं । हीरबेरं हीरबेरौषधजलपूर्णं । औशीरं उशीरोदकभृतं । कौष्ठं कुष्ठौषधजलपूर्णं । सार्षपं सर्षपोदकभृतं ॥ १०४ ॥

नदीसङ्गमजं चैव ताटाकं कौप्यमेव वा ।
निर्झरोदमिति प्रोक्ता विशेषकलशास्त्विमे ॥
शुद्धोदद्वयमप्येतन्महातीर्थसमुद्भवम् ॥ १०५ ॥

नदीसङ्गमजं । नदीसङ्गमोदकभृतं । ताटाकं तटाकोदकपूर्णं । कौप्यं कूपोदकपूर्णं । निर्झरोदं निर्झरजलपूर्णम् ॥ १०५ ॥

चतुर्विंशतिमूर्तीनां वर्णमूर्तीस्तथाऽऽपराः ।
आवाहयेच्छतत्वे तु क्रमव्युत्क्रमतस्तु ताः ॥ १०६ ॥
वर्णमूर्तीः पुनश्चैव द्विचतुर्वारमेव च ।
सहस्रकलशादित्वे जपेन्मन्त्रांश्च भक्तितः ॥ १०७ ॥

चतुर्विंशतिकेशवाद्याः । वर्णमूर्तीः अजाद्याः । कलशेष्वावाहयेत् । कुम्भानां शतत्वे तदधिकत्वे च ता एव मूर्तीः क्रमव्युत्क्रमाभ्यां आवाहयेत् ॥ १०६-१०७ ॥

ततस्तु पञ्चघोषैश्च स वेदैस्तथाऽऽदरात् ।
आनीय प्रतिमां स्नानं कारयेत्प्रणवेन तु ॥ १०८ ॥
मन्त्रैः पुरुषसूक्तान्तैः विश्वतश्चक्षुषा तथा ।
पुनश्चाष्टाक्षरेणैव प्रणवेन च भक्तितः ॥ १०९ ॥
स्नापयित्वा गन्धजलैर्गन्धपुष्पादिभिः पुनः ।
अलङ्कृत्य स्थापयेत्तु प्रतिमां प्रणवेन तु ॥ ११० ॥

पा- १. कुशोदकं । २. हरिद्रोदं । ३.नदीसङ्गमगं । ४. ताडागं

पञ्चघोषैः वेदघोषैश्च तत्र प्रतिमामानीय मण्डलविन्यस्तपीठोपरि स्थापितां प्रणवादिमन्त्रैः स्नापयेत् । ततो गन्धोदकैः स्नापयित्वा अलङ्कृत्य प्रणवेन स्थापयेत् ॥ १०८-११० ॥

जपेदष्टाक्षरं मन्त्रं तत्तन्मूर्तिमनुं तथा ।
अष्टोत्तरशतं मन्त्री ध्यायेत्तेजोमयीं पुनः ॥ १११ ॥
प्रतिमां प्रतिमान्तस्थां तन्मध्ये परमं वपुः ।
चिदानन्दरसं सर्वगुणसम्पूर्णमुत्तमम् ॥ ११२ ॥

अष्टाक्षरं तत्तन्मूर्तेः प्रतिष्ठापयिषितकृष्णादिमूर्तेः मनुं मन्त्रं अष्टोत्तरशतं जपेत् । ततः प्रतिमान्तस्थां तेजोमयीं प्रतिमां ध्यायेत् । तस्या तेजोमय्याः मध्ये चिदानन्दरसं सर्वगुणसम्पूर्णं हरिं ध्यायेत् ॥ १११-११२ ॥

पञ्चविंशतितत्वानां देवतास्तदनन्तरम् ।
स्थापयेत् प्रतिमामध्ये परितः केशवस्य तु ॥ ११३ ॥
तत्रात्वाहार्षसूक्तं च घर्मसूक्तं च वैष्णवम्
सूक्तं च विश्वकर्मीयं पौरुषं सूक्तमेव च ॥ ११४ ॥
जप्त्वा चैव निजं मन्त्रं पुनरष्टाक्षरं सुधीः ।
प्रणवं च जपेद्विष्णुं ध्यायन्नुत्तमरूपिणम् ॥ ११५ ॥

प्रतिमामध्ये ध्यातस्य केशवस्य परितः तत्त्वदेवताः ध्यायेत् । जप्यसूक्तान्याह । आत्वाहार्षमित्यादिसूक्तं । घर्मा समन्तादिति घर्मसूक्तं । वैष्णवं अतो देवा इत्यादिविष्णुसूक्तं । य इमा विश्वा भुवनानीत्यादि विश्वकर्मसूक्तं । निजं मन्त्रं प्रतिष्ठाप्य कृष्णादिमन्त्रं अष्टाक्षरं प्रणवं च विष्णुं ध्यायन् जपेत् ॥ ११३-११५ ॥

ततस्तु कलशैर्बाह्यक्रमेणैव जनार्दनम् ।
स्नापयेदुक्तमन्त्रैस्तु मध्यमं प्रणवेन तु ॥ ११६ ॥
अष्टार्णेन निजेनापि तथा पुरुषसूक्ततः ।
आवाहनं च स्नपनं पञ्चगव्येन मध्यवत् ॥
पूर्वाद्युत्तरपर्यन्तः कलशक्रम उच्यते ॥ ११७ ॥

जप्त्वा पुनश्च तन्मन्त्रान् पूजयेच्च विधानतः ।
द्वारलोकपतिभ्यश्च बलिं दत्वा यथाक्रमम् ॥ ११८ ॥

ततः कलशैः ब्राह्मक्रमेण पूर्वाद्युत्तरपर्यन्तं स्थापयेत् । पश्चात् मध्यमकलशेन पञ्चगव्यकलशेन अभिषिच्य वस्त्रालङ्कारादिभिरलंकृत्य विधानतः सम्पूज्य द्वारलोकपेभ्यो बलिं दद्यात् ॥ ११६-११८ ॥

वस्त्ररत्नहिरण्याद्यैरलङ्कृत्य विभूतितः ।
गुरवे दक्षिणां दद्यात्कोटिं लक्षं सहस्रकम् ॥ ११९ ॥
शतमर्धं तदर्धं वा निःस्वो भक्त्या क्षमापयेत् ।
तदर्धमृत्विजां चैव तदर्धं पारणाकृताम् ॥ १२० ॥

तदर्धं गुरुदक्षिणार्धं ऋत्विजां ऋत्विग्भ्यः । तदर्धं ऋत्विग्दक्षिणार्धं पारणाकृतां पारायणकृद्भ्यः जापकेभ्यः ॥ ११९-१२० ॥

आश्वभ्य आश्वपाकेभ्यो दद्यादन्नं समस्तशः ।
पुरस्तात्परतश्चैव सप्तरात्रं निरन्तरम् ॥ १२१ ॥
सुवर्णवस्त्ररत्नाद्यैरागताभ्यागतानपि ।
पूजयेच्छक्तितो भक्त्या प्रीयतां भगवानिति ॥ १२२ ॥

पुरस्तात् प्रतिष्ठातः पुरस्तात् । परतः प्रतिष्ठानन्तरं च कुर्यादित्यर्थः ॥ १२१-१२२ ॥

गीतनृत्यैश्च वाद्यैश्च पुराणैरितिहासकैः ।
सूक्तैर्मङ्गलघोषैश्च वैदिकैर्दिनसप्तकम् ॥ १२३ ॥
नयेत्ततो महाराजविभूत्याऽवभृथं सुधीः ।
कारयेद्देवदेवस्य स्वाध्यायैर्गीतनर्तनैः ॥ १२४ ॥
महानदीसङ्गमे तु तीर्थे चातिप्रशस्तके ।
स्नापयेत् पूर्ववन्मन्त्रैः पुंसूक्तान्तैः स्मरन् हरिम् ॥ १२५ ॥

ततो गीतनृत्याद्युत्सवेन दिनसप्तकं नयेत् । ततो नदीसङ्गमादिप्रशस्ततीर्थेन देवस्य

अवभृथं यागान्ते महाभिषेकं पूर्वोक्तमन्त्रैः कुर्यात् ॥ १२३-१२५ ॥

ततः पूर्ववदागत्य प्रवेश्य पुरुषोत्तमम् ।
पूजयित्वा विधानेन दत्वा दानानि शक्तितः ॥ १२६ ॥
गुरुं च भक्त्या सम्पूज्य स्वीकुर्यादाशिषस्ततः ।
शतप्रस्थादनूनं तु नैवेद्यं पायसोत्तरम् ॥ १२७ ॥
दिनेष्वेतेषु दातव्यं सघृतं ससितादिकम् ।
पश्चादपि यथाशक्ति पूजा कार्या हरेः सदा ॥ १२८ ॥

शतप्रस्थादनूनम् । ततो न्यूनं नैवेद्यं न कुर्यादित्यर्थः ॥ १२६-१२८ ॥

जीर्णालयोद्धृतौ चैवं तत्त्वमन्त्रान् स्वकं तथा ।
प्रातिलोम्येन जप्त्वैव मूर्तौ सङ्कोचयेद्धरिम् ॥ १२९ ॥

जीर्णालयोद्धृतौ जीर्णोद्धारे ॥ १२९ ॥

उक्तेनैव विधानेन तदर्धविभवैः सुधीः ।
पादमात्रैरपि हरिं स्नापयित्वा यथोचितम् ॥ १३० ॥
एतेनैव विधानेन कृत्वा देवालयं पुनः ।
स्नापयेत् पुण्डरीकाक्षं द्विगुणेन प्रवाहणात् ॥ १३१ ॥
विभवेनानुलोमेन जपन्मन्त्रान् पुनस्तथा ।
आराधयेज्जगन्नाथं ध्यायन् भक्त्या यथोदितम् ॥ १३२ ॥
यात्राऽपि पूर्ववत्तत्राप्युत्सवेषु च सर्वशः ।
कलशोक्तविधानेन पूजा बलिहृतिस्तथा ॥ १३३ ॥
उत्सवेषु सदा कार्या कलशश्चोत्सवादनु ।
यात्रा स्नानं च कर्तव्यं सम्यगुक्तविधानतः ॥ १३४ ॥

प्रवाहणात् सङ्कोचनात् । द्विगुणेन विभागेन । अनुलोमेन अनुक्रमेण ॥ १३०-१३४ ॥

चोरचण्डालपतितश्वोदक्यादिप्रवेशने ।
शवाद्युपहतौ चैव पूजाविच्छेदने तथा ॥ १३५ ॥

स्नापनोक्तेन मार्गेण प्रायश्चित्तकृतिः स्मृता ।
सर्वत्र विष्णुगायत्र्या होमः स्यादयुतावरः ॥ १३६ ॥

चोरादीनां मूलमन्दिरप्रवेशे । उदकी रजस्वला । शवादीनां अत्यशुचीनां उपहतौ पारम्पर्येणाऽपि स्पर्शादौ । पूजायाः विच्छेदने राहित्ये ॥ १३५-१३६ ॥

नावान्याद्यभिधानानु विद्महे धीमहे तथा ।
प्रचोदयात्तृतीयाधस्तन्नो गायत्रिनामिका ॥ १३७ ॥
दुर्गाशिवस्कन्दसूर्यविनायकमुखानपि ।
स्थापयेदुक्तमार्गेण तत्तन्मन्त्रैः स्मरन् हरिम् ॥ १३८ ॥

विष्णुगायत्र्युद्धारमाह । नावेति । ना इत्यनेन नारायणायेति ग्राह्यम् । तदधः विद्महे इति योज्यम् । वा इति वासुदेवाय । तदधः धीमहि इति योज्यम् ॥ ततः तन्नो विष्णुः प्रचोदयात् इति । तथाच नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् इति मन्त्राकारः ॥ १३७-१३८ ॥

गोलकद्वितयं विष्णोस्त्रितयं वाऽपि कीर्तितम् ।
अन्यदेवप्रतिष्ठासु तदन्तश्चिन्तयेद्धरिम् ॥ १३९ ॥

गोलकद्वितयमिति । विष्णौ विष्णुप्रतिमाप्रतिष्ठायां गोलकद्वितयं प्रतिमाद्वयं प्रतिष्ठाप्या एका तन्मध्ये तेजोमयी द्वितीया इति गोलकद्वितयम् । तृतीयः स्वयं विष्णुः । अन्यदेवप्रतिष्ठासु त्रितयम् । प्रतिष्ठाप्या अन्यदेवप्रतिमा एका । द्वितीया तद्देवप्रतिमा तेजोमयी । तृतीयस्तद्देव इति त्रितयम् । चतुर्थः तदन्तस्थो विष्णुरिति ॥ १३९ ॥

विष्णुस्मृतिविहीना तु पूजा स्यादासुरी तथा ।
गृह्णन्ति देवता नैतां ततः स्याद्देशविप्लवः ॥
व्याधिचोराधिभिस्तस्मादन्तर्ध्येयो हरिः सदा ॥ १४० ॥

व्याध्यादिभिर्देशविप्लव इत्यन्वयः ॥ १४० ॥

विष्णुभक्तिविहीनस्य गतिः स्यान्न शुभा क्वचित् ।
भक्तस्याप्यन्यदेवेषु तस्माध्येयो हरिः सदा ॥ १४१ ॥
संस्मृतो भगवान्विष्णुः सर्वमङ्गलमङ्गलः ।
समस्ताभीष्टदायी स्यात्तेन ध्येयोऽखिलैर्जनैः ॥ १४२ ॥

पुरुषोऽव्यक्तं च महानहङ्कारो मनस्तथा ।
दशेन्द्रियाणि शब्दाद्याः भूतेताः पञ्चविंशतिः ॥ १४३ ॥

पञ्चविंशतितत्वानीत्युक्तम् । तद्विभागमाह । पुरुषोऽव्यक्तमिति । शब्दाद्याः शब्दस्पर्शरूपरसगन्धाः । भूतेताः पञ्चमहाभूतैः सहिताः ॥ १४१-१४३ ॥

तत्त्वाख्याः कालमाये च नियतिर्मतिरेव च ।
विद्या कला प्रवृत्तिश्च द्वाविंशत्तत्त्वसङ्ग्रहः ॥ १४४ ॥
स्फूर्तिः संवित्प्रतिष्ठा च शक्तिरित्यपराणि तु ।
महालक्ष्मीस्वरूपाणि एकादश विदो विदुः ॥
विष्णोरपि हि रूपाणि तन्नाम्नैकादशैव तु ॥ १४५ ॥

कालादिशक्त्यन्तानि एकादशतत्वानि पृथक् सन्ति। तानि च विष्णोर्महालक्ष्म्याश्च रूपाणि ॥ १४४-१४५ ॥

प्रधानोपमवर्णानि द्विभुजान्यप्यशेषतः ।
कृताञ्जलिपुटान्येव प्रधानं तं हरिं प्रति ॥ १४६ ॥
सर्वाण्येतानि तत्त्वानि,

तत्त्वदेवानां ध्यानमाह। प्रधानेति। प्रधानः सर्वोत्तमः श्रीनारायणः तदुपमवर्णानि उद्यद्भास्वद्वर्णानि। अथवा प्रधानमव्यक्तम् । तद्वर्णानि तस्य त्रिगुणात्मकतया शुक्लकृष्णरक्तत्वात् । प्रधानं प्रधानस्थितं हरिं प्रति कृताञ्जलिपुटानि । तदेवं पुरुषादि शक्त्यन्तानि षट्त्रिंशत्तत्वानि ॥ १४६ ॥

ब्रह्मा तु पुरुषः स्मृतः ।
महांश्चाव्यक्तनाम्नी तु ब्रह्माणी संप्रकीर्तिता ॥ १४७ ॥
एवं वायुरपि ज्ञेयो भारती चापि तत्त्रयम् ।
रुद्रोऽहङ्कार उद्दिष्टः स्कन्देन्द्रौ मन उच्यते ॥ १४८ ॥
अहङ्कारः शेषवीन्द्रावपि विद्वद्भिरीरितौ ।
दिग्वायुसूनुसूर्याश्च वरुणश्चाश्विनावपि ॥ १४९ ॥
वह्निदक्षाविन्द्रसूनुः मित्रस्यैव मनुस्तथा ।
इन्द्रियाख्या शब्दनामा बृहस्पतिरुदाहृतः ॥ १५० ॥

अन्ये तु सूनवो वायो रुद्रस्यापि प्रकीर्तिताः ।
एतेषु भगवान्विष्णुः प्रधानतनुरेव तु ॥ १५१ ॥

तत्वाभिमानिदेवानाह । ब्रह्मा त्विति ॥ १४७-१५१ ॥

ध्येयः परात्मनोर्मध्ये तत्त्वनामा तदर्थयोः ।
जपे न्यासे च नमोऽन्तस्तु स्वाहान्तो होमकर्मणि ॥ १५२ ॥

तत्वन्यासप्रकारमाह । परात्मनोरिति । तदर्थयोः तत्वार्थभूतयोः परात्मनोः चतुर्थ्यन्तपरात्मशब्दयोर्मध्ये तत्वनाम वक्तव्यमित्यर्थः । पराय पुरुषात्मने ब्रह्मणे नम इत्यादि ॥ १५२ ॥

त्रिचतुष्षड्दशावृत्तिरेतेषां तु हुतादिके ।
न्यासोऽङ्गुलीषूरुबाहुमध्येषु व्युत्क्रमे स्मृतः ॥
क्रमे विपर्ययेणात्र शक्त्यादित्वं प्रकीर्तितम् ॥ १५३ ॥

एतेषां तत्वमन्त्राणां हुतादिके होमादौ त्रिरावृत्तिः कर्तव्या । न्यासस्थानान्याह । अङ्गुलीष्विति । अयं संहारन्यासक्रमः । तथाहि वामपादकनिष्टमारभ्य अङ्गुलिपर्यन्तं पृथिव्यादिपञ्चकं न्यसेत् । ॐ पराय पृथिव्यात्मने धरायै नम इत्यादि । दक्षिणपादकनिष्ठमारभ्याङ्गुष्ठपर्यन्तं गन्धादिपञ्चकं न्यसेत् । वामदक्षोर्वोः क्रमेण मनोऽहङ्कारौ । वामदक्षबाह्वोः अव्यक्तमहती न्यसेत् । पुरुषादिशक्त्यन्तं हृदि न्यसेत् । एतद्विपर्ययेण सृष्टिक्रमः । स यथा शक्त्यादिपुरुषपर्यन्तं हृदि । अव्यक्तमहदहङ्कारमनांसि क्रमेण दक्षवामबाहूरुषु । दक्ष हस्ताङ्गुष्ठमारभ्य कनिष्टपर्यन्तं श्रोत्रादिपञ्चकं न्यसेत् । वामहस्तादि कनिष्टान्तं वागाद्युपस्थान्तपञ्चकं न्यसेत् । दक्षपादाङ्गुष्टादि कनिष्टान्तं शब्दादिपञ्चकम् ।वामपादाङ्गुष्टतः कनिष्टान्तमाकाशादिपञ्चकं न्यसेदिति सृष्टिन्यासः । [१]पृथिव्यादिपुरुषान्तः स्थितिन्यासः । सृष्टिस्थितिसंहारस्थितिन्यासो गृहस्थानाम् । संहारस्थितिसृष्टिसंहारन्यासो यतीनां इति आगमान्तरतोऽवसेयं । यदाहुः न्यासः संहारान्तो मस्करि वैखानसेषु विहितोऽयं । स्थित्यन्तो गृहमेधिषु । सृष्ट्यन्तो वर्णिनां इति प्राहुरिति । अत्र तत्तद्देवतामन्त्रेण तत्तदङ्गस्पर्शे मन्त्रपूतदेहवान् भवतीत्यत्रैव तात्पर्यम् । मन्त्रमूर्तिर्भवेद्बुध इति उक्तेः । नतु तदङ्गे ते देवा आश्रिता इति । प्रमाणान्तरविरोधादिति

१.इतः पूर्वं शक्त्यादिकालान्तः इति भवेत् । तत्त्वकणिकानुरोधात् ।

भावः ॥ १५३ ॥

ऋषिच्छन्दोदेवताङ्गध्यानानुक्तौ प्रधानवत् ।
ज्ञेया मन्त्रास्समस्तास्ते पृथङ्मोक्षादिदायकाः ॥ १५४ ॥

ऋषिश्छन्द इति । प्रधानवत् । मूलमन्त्रवत् ॥ १५४ ॥

तन्त्रमार्गास्तु हरिणा ह्यसङ्ख्याः कीर्तिता अपि ।
तेष्वयं सुगमो मार्गः सफलश्चानुतिष्ठताम् ॥ १५५ ॥
यावतो ह्यननुष्ठाने कर्मपूर्तिर्न विद्यते ।
तावत्समस्तं कथितं [1]ह्यस्मिंस्तन्त्रे यथाविधि ॥ १५६ ॥
प्रीयते तेन मार्गेण पूजितो मुक्तिदो भवेत् ।
कामदश्च स्वभक्तानां भगवान् पुरुषोत्तमः ॥ १५७ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते
श्रीमत्तन्त्रसारसङ्ग्रहे तृतीयोऽध्यायः ॥ ३ ॥

यावत इति । यावत अकरणे कर्मसाङ्गता न भवति तावदिह तन्त्रे कथितम् । अत एवैतदविरुद्धतन्त्रान्तरोक्तानुष्टानेऽपि न दोषः । एतदुक्ताकरणे तु न कर्मपूर्तिरिति भावः ॥ १५४-१५७ ॥

इति श्रीमध्वमाधवानुग्रहैकसहायश्रीवेदवेद्यशिष्यविरचिते
तन्त्रसारसङ्ग्रहव्याख्याने तन्त्रसारविवृतौ
तृतीयोऽध्यायः समाप्तः ॥ ३ ॥

।। अथ चतुर्थोऽध्यायः ।।

अथ विष्णूदिते तन्त्रसारे मन्त्रगणो हि यः ।
उदितः सङ्ग्रहेणासावुच्यतेऽखिलसाधकः ।। १ ।।

मन्त्रोद्धारादि वक्तुमुपक्रमते । अथेति । सङ्ग्रहेण सङ्क्षेपेण ।। १ ।।

याष्टमस्तूयुतोऽन्तेन समेतश्चैव भूभृतः ।
बीजं नमश्च भगवान् सोद्देश्यो रूपसंयुतः ।। २ ।।
स एव तादृशो लोकत्रयपालो भुवः पतेः ।
भावं मे देहि दान्ते तु दापय स्वाहया युतः ।। ३ ।।

वराहमन्त्रमुद्धरति । याष्टम इति । यकारादष्टमवर्णो हकारः । उयुतः उकारेण युक्तः । अन्ते बिन्दुना संयुक्तः । भूभृतो वराहस्य बीजम् । तदनु नमः शब्दः भगवान् भगवच्छब्दः उद्देश्यः चतुर्थ्यन्तः रूपसंयुक्तः । स एव वराहशब्द एव तादृशः चतुर्थ्यन्तः । वराहरूपायेति । लोकत्रयपालोऽपि चतुर्थ्यन्तः । तथा च ॐ हुं नमो भगवते वराहरूपाय भूर्भुवःस्वःपतये भूपतित्वं मे देहि ददापय स्वाहेति मन्त्रः । त्रयस्त्रिंशदक्षरोऽयम् ।। २-३ ।।

मनुस्तस्यापरो नामबीजोद्देशनमोयुतः ।
नमः सोद्देशभगवान् महाशब्दयुतश्च सः ।।
तादृशः स्वाहया युक्तो वराहस्योपरो मनुः ।। ४ ।।

सप्ताक्षरं वराहमन्त्रान्तरमाह । मनुस्त्वस्यापर इति । नामबीजं पूर्वोक्तं । उद्देशः चतुर्थी । नमः शब्देन युक्तः । आदौ बीजं ततः चतुर्थ्यन्तो वराहशब्दः । तथा च हुं वराहाय नमः इति सप्ताक्षरो मन्त्रः । मन्त्रान्तरमाह । आदौ नमः शब्दः । ततः चतुर्थ्यन्तो भगवच्छब्दः । महाशब्दयुतः सः वराहः । तादृशः सोद्देशः । अन्ते स्वाहापदेन युक्तः । ततश्च नमो भगवते महावराहाय स्वाहेति चतुर्दशाक्षरः तृतीयो वराहमन्त्रः ।। ४ ।।

श्यामः सुदर्शनदराभयसद्वरेतो
भूम्या युतोऽखिलनिजोक्तपरिग्रहैश्च ।
ध्येयो निजैश्च तनुभिः सकलैरुपेतः
कोलो हरिः सकलवाञ्छितसिद्धयेऽजः ।। ५ ।।

उक्तमन्त्रत्रयस्यापि ध्यानमाह । श्याम इति । सुदर्शनदराभयसद्वरेतः चक्रशङ्खाभयवर मुद्रायुक्तबाहुचतुष्टयः ।। ५ ।।

वैष्णवानां मुनिर्ब्रह्मा मन्त्राणां वर्णभेदतः ।
ज्ञेयं छन्दो देवतैकस्तत्तद्रूपो हरिः परः ॥ ६ ॥

सर्वमन्त्रसाधारणऋष्यादीनाह । वैष्णवानामिति ॥ ६ ॥

प्रणवेन स्वनाम्ना च भूधरेण परात्मना ।
सर्वज्ञसर्वशक्तिभ्यां षडङ्गानि विदो विदुः ॥ ७ ॥

षडङ्गान्याह । प्रणवेनेति ॥ ७ ॥

ज्ञानैश्वर्यप्रभानन्दतेजः शक्तिभिरेव च (वा) ।
पूर्णात्ममध्यगैः सर्ववैष्णवाङ्गान्यथो विदुः ॥ ८ ॥

सर्वमन्त्रसाधारणाङ्गान्याह। ज्ञानैश्वर्येति। पूर्णशब्दात्मशब्दमध्यगैः। पूर्णज्ञानात्मने नम इत्यादि। अनुक्ताङ्गेषु मन्त्रेषु एतान्येवाङ्गानीत्यवधेयम् ॥ ८ ॥

तिष्ठोदादिस्वजायायाः कारणं स्वाहया युतः ।
श्रीकरोऽष्टाक्षरो मन्त्रो गरुडारूढसंस्मृतिः ॥ ९ ॥

श्रीकरमन्त्रमाह ॥ तिष्ठेति पदं । उदादितिष्ठेति । उत्तिष्ठ । स्वजायायाः श्रीशब्दः । कारणं करशब्दः । स्वाहाशब्देन युतः । तथाच उत्तिष्ठ श्रीकर स्वाहेति अष्टाक्षरोऽयं मन्त्रः गरुडमारूढो ध्येयः ॥ ९ ॥

*आदित्यचन्द्रावपि चक्रशङ्खौ शङ्खप्रसूनाख्यनिधी दधानः ।
चिन्त्यः कराभ्यां वसु तर्पयन्नः स्वाङ्कस्थलक्ष्मीर्गरुडांससंस्थः॥

द्विर्भीषय त्रासय च प्रमर्दय तथैव च ।
प्रध्वंसयाथो रक्षेति पञ्चाङ्गश्चेत्युदाहृतः ॥ १० ॥

अङ्गान्याह। द्विर्भीषयेति। भीषय भीषय हृदयाय नम इत्यादि ॥ १० ॥

क्रूरं वीरं बृहद्विष्णुं दीप्यन्तं विश्वतोमुखम् ।
पुंमृगेन्द्रं भयकरं शुभं मृत्योश्च मारकम् ॥
नमामि स्वयमित्येष द्वात्रिंशार्णो मनुर्हरेः ॥ ११ ॥

नृसिंहमन्त्रमाह । क्रूरमिति । क्रूरं उग्रं वीरं बृहद्विष्णुं महाविष्णुं दीप्यन्तं ज्वलन्तं विश्वतो मुखम् सर्वतो मुखम् । पुंमृगेन्द्रं नृसिंहं । भयङ्करं भीषणं ।

*अस्मदुपलब्धमूलकोशेऽयं श्लोको उल्लिखितः। एम्.एस्.नं.-२७५ शम्याप्रस हस्तलिखितग्रन्थालयः।

शुभं भद्रं । मृत्योः मारकं मृत्युमृत्युं नमामि स्वयं अहमिति । एवं च उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् । नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥ इति द्वात्रिंशदक्षरोऽयं मन्त्रः ॥ ११ ॥

द्विर्जयस्योपरि निजं सोद्देशं सर्ववित्तथा ।
महातेजोबलं वीर्यं तादृशं स्वाहया युतम् ॥
चतुर्विंशाक्षरो मन्त्रो निखिलेष्टप्रदायकः ॥ १२ ॥

तस्यैव मन्त्रान्तरमाह । द्विर्जयस्येति । जयद्वयस्यापि । सोद्देश्यं चतुर्थ्यन्तं । अन्ते स्वाहापदेन युक्तम् । एवं सति जयजय नरसिंहाय सर्वज्ञाय महातेजोबलवीर्याय स्वाहेति चतुर्विंशत्यक्षरोऽयं मन्त्रः ॥ १२ ॥

विद्महे धीमहे पूर्वं स्वयं चैव महाबलः ।
प्रेरयेत्तन्न इत्येतन्मध्येऽनन्तः प्रकीर्तितः ॥ १३ ॥

नृसिंहगायत्रीमाह । विद्मह इति । विद्मह इत्यतः पूर्वं स्वाङ्गेन । नृसिंहश्चतुर्थ्यन्तः। धीमहीत्यतः पूर्वं महाबलपदं चतुर्थ्यन्तं प्रेरयेत् न्नः । तत्सपदयोर्मध्ये अनन्तशब्दः । तथा च नरसिंहाय विद्महे महाबलाय धीमहि । तन्नोऽनन्तः प्रचोदयात् इति चतुर्विंशत्यक्षरनृसिंहगायत्रीमन्त्रः ॥ १३ ॥

पादैर्व्यस्तैः समस्तैश्च पादैश्चाङ्गं प्रकीर्तितम् ।
पूर्वयोस्तत्र पूर्वं तु सर्वज्ञेन षडङ्गकम् ॥
तृतीयं तु द्विरावृत्तैः पादैरङ्गसमन्वितम् ॥ १४ ॥

अङ्गन्यासमाह । पादैरिति । त्रिषु मन्त्रेषु पूर्वयोः मन्त्रयोः पादैः व्यस्तेन समस्तेन च पञ्चाङ्गानि । सर्वज्ञपदेन चतुर्थ्यन्तेन षष्टं अङ्गं इति । द्वात्रिंशद्वर्णमन्त्रे तृतीयं गायत्रीरूपं द्विरावृत्तैः त्रिभिः पादैरेव षडङ्गमिति ॥ १४ ॥

ध्यायेन्नृसिंहमुरुवृत्तरवित्रिनेत्रम्
जानुप्रसक्तकरयुग्ममथापराभ्याम् ।
चक्रं दरं च दधतं प्रियया समेतं
तिग्मांशुकोट्यधिकतेजसमग्रचशक्तिम् ॥ १५ ॥

मन्त्रत्रयस्यापि ध्यानमाह । नृसिंहमिति । उरुणि विलसन्ति वृत्तानि रवितेजोमयानि त्रीणि नेत्राणि यस्य तम् ॥ १५ ॥

सर्वेष्वपि हि मन्त्रेषु व्याद्यनन्तान्तबाहुकः ।
चेतनान्तरस्थमारभ्य सर्वगान्तस्थरूपवान् ॥ १६ ॥
अनन्तरूपो ध्येयोऽत्र स्वगुरूक्तानुसारतः ।
यथायोग्यं यथाशक्ति तत्तदायुधभूषणः ॥ १७ ॥

सर्ववैष्णवमन्त्रेषु विशेषध्यानमाह। सर्वेष्विति। व्यादि द्विप्रभृति अनन्तसङ्ख्यान्ताः बाहवो यस्य सः। चेतनान्तस्थं जीवान्तर्यामिणं आरभ्य सर्वगतान्तस्थरूपः अनन्तानि रूपाणि यस्य सः। तानि तानि आयुधानि भूषणानि च यस्य सः ॥ १६-१७ ॥

शङ्खचक्रगदापद्मखड्गखेटाः सशार्ङ्गकाः ।
शरो मुसलवज्रौ च हलः पाशाङ्कुशौ तथा ॥ १८ ॥
शूलं च भिण्डिपालश्च पट्टिशोऽग्निर्वराभये ।
तर्कमुद्राऽक्षमाला च पुस्तकं च विदारणम् ॥
इत्यादीन्यखिलान्येव विष्णोश्चिन्त्यानि बाहुषु ॥ १९ ॥

आयुधान्याह । शङ्खचक्रेति । भिण्डिपालपटिशौ आयुधविशेषौ । तर्कमुद्रा ज्ञानमुद्रा । विदारणं परशुः आयुधान्तरं वा ॥ १८-१९ ॥

वियत्स इति युग्मार्णो विपरीतश्च स स्मृतः ।
स सर्गहीनो वेतश्च बिन्दहीनोत्तरस्तथा ॥ २० ॥
त्रय एते महामन्त्राः पुरुषार्थचतुष्टये ।
कल्पवृक्षाः प्रिया विष्णोर्विशेषज्ञानदायकाः ॥ २१ ॥
तैरेव तु द्विरावृत्तैरङ्गमेषां प्रकीर्तितम् ।
श्वासरूपो जपो नित्यमुभयोर्विद्वदज्ञयोः ॥ २२ ॥

हंसमन्त्रमाह । वियत्स इति । वियत् हकारः बिन्दुयुतः । तदनन्तरं सकारः । ततश्च हंस इत्येकमन्त्रः । स एव विपरीतः प्रतिलोमेन उक्तः । सोऽहमिति द्वितीयो मन्त्रः । विसर्गहीनः सकारोपेतः वकारेण युक्तः । दीर्घे च बिन्दुहीनः । उत्तरो हकारो दीर्घान्तो यस्य सः । ततश्च स्वाहा इति तृतीयो मन्त्रः । द्विरावृत्तैः तैरेव मन्त्रैः एतेषां षडङ्गानि । अयं जपः विद्वदज्ञसाधारणश्वासरूपः ॥ २०-२२ ॥

एकविंशत्सहस्रात्मा सषट्शतमहर्निशम् ।
अर्पणीयो हरौ नित्यं प्रातर्योगो महानयम् ।। २३ ।।
अशेषदोषदहनस्तत्त्वज्ञानप्रदायकः ।
अष्टैश्वर्यप्रदश्चैव कृतादौ समुपासताम् ।।
तारयोगोऽप्येवमेव ब्रह्मादावेव वर्तते ।। २४ ।।

षट्शतोत्तरैकविंशतिसहस्रसङ्ख्याका अनिशं भवति । स च विष्णावर्पणीय इति योगः प्रणवयोगः । सोऽप्येकमन्त्रः । तत्र ब्रह्मादिदेवतानामेवाधिकारः ।। २३-२४ ।।

ध्यायेद्रवीन्दुकरमिन्दुसहस्रलक्ष
कान्तिं प्रियासहितमास्थितमिन्दुबिम्बे ।
शङ्खारिदोर्द्वयमुदर्कमहेन्दुबिम्बा-
त्संसिच्यमानममृतेन रमाधिनाथम् ।। २५ ।।

ध्यानमाह । ध्यायेदिति ।। २५ ।।

अन्त्यस्य रक्तवर्णो वा ध्येयो विष्णुः सनातनः ।
विद्युद्वर्णोऽथवा ध्येयः शक्त्येतः पञ्चमन्त्रयुक् ।। २६ ।।
अष्टाक्षरो महामन्त्रः तैरेवाङ्गैः समन्वितः ।
अन्त्यध्यानयुतश्चैव निःशेषपुरुषार्थदः ।। २७ ।।

अन्त्यस्य स्वाहामन्त्रस्य रक्तवर्णो विद्युद्वर्णो वा ध्येयः । शक्त्येतः । शक्त्या ह्रीकारेण युतः । सप्रणवः पूर्वोक्तः पञ्चमो मन्त्रः । सोऽपि देवोपास्य इति ज्ञेयः। आदौ प्रणवः । ततो ह्रीं । ततः पूर्वोक्तषडक्षराणि । तथा च ॐ ह्रीं हंसः सोऽहं स्वाहेत्यष्टाक्षरोऽयं महामन्त्रः । तैः पूर्वोक्तैरङ्गैः समन्वितः । अन्त्यध्यानयुतः विद्युद्वर्णध्यानोपेतः ।। २६-२७ ।।

मूलं नः प्रतिषेधश्च सोद्देशो भगवानपि ।
विष्णुर्भोज्याधिपः स्वाहायुक्तोऽष्टादशवर्णकः ।। २८ ।।
अङ्गानि तत्पदैरेव मन्त्रचिन्तामणिः स्वयम् ।
यथेष्टभक्षभोज्यादिदाता मुक्तिप्रदायकः ।। २९ ।।

अपरं भोज्याधिपतिमन्त्रमाह । मूलमिति । मूलं नः नकारः प्रतिषेधो मकारः ।

ततश्चतुर्थ्यन्तं भगवत्पदम् । विष्णुश्चतुर्थ्यन्तः भोज्याधिपः अन्नाधिपतिपदं चतुर्थ्यन्तं स्वाहया युक्तम् । तथा च ॐ नमो भगवते विष्णवे अन्नाधिपतये स्वाहा इत्यष्टादशवर्णो मन्त्रचिन्तामणिः । मन्त्रपदैः षड्भिः षडङ्गानि ॥ २८-२९ ॥

ध्यायेत्सुशुक्लमरविन्ददलायताक्षं
सौवर्णपात्रदधिभोज्यमथामृतं च ।
दोर्भ्यां दधानमुखिलैश्च सुरैः परीतं
शीतांशुमण्डलगतं रमया समेतं ॥ ३० ॥

ध्यानमाह । ध्यायेदिति ॥ ३० ॥

अमृतं स्वयमुद्देशयुक्तः सहृदयो मनुः ।
सतारोऽष्टाक्षरोऽङ्गानि पदैर्व्यस्तैः समस्तकैः ॥ ३१ ॥

वामनमन्त्रमाह । अमृतमिति । अमृतं वकारः । बिन्दुयुतः । स्वयं वामनः उद्देशयुक्तः । चतुर्थ्यन्तः । सहृदयः नमेति । स प्रणवः आदौ प्रणवयुक्तः । तथा ॐ वं वामनाय नमः इत्यष्टाक्षरोऽयं मन्त्रः । पदैः व्यस्तैः समस्तैरङ्गानि ॥ ३१ ॥

उद्यद्रविप्रभमरीन्द्रदरौ गदां च
ज्ञानं च बिभ्रतमजं प्रियया समेतं ।
विश्वावकाशमभितः परिपूरयन्तं
भासा स्वया स्मरत विष्णुमजादिवन्द्यम् ॥ ३२ ॥

ध्यानं उद्यद्रविप्रभमिति । अमृतं स्वयमित्यत्र अमृतपदं सोद्देशं स्वयं आत्मशब्दोपेतम् । ॐ अमृतात्मने नम इत्यपि मन्त्रान्तरं विवृतं भवति । अस्य तु द्विरावृत्तैः पदैरङ्गानि । ध्यानन्तूक्तमेव ॥ ३२ ॥

त्रिविक्रमश्च सोद्देशो विश्वरूपश्च तत्परः ।
धीविदौ च महे विष्णुस्तन्नः प्रेरणमध्यगः ॥ ३३ ॥

त्रिविक्रमगायत्रीमाह । त्रिविक्रमस्त्विति । सोद्देशः चतुर्थ्यन्तः त्रिविक्रमात्परं विद्महे विश्वरूपात्परं धीमहि । ततः परं तन्नो विष्णुः प्रचोदयात् इति योज्यम् । तथा च त्रिविक्रमाय विद्महे विश्वरूपाय धीमहि । तन्नो विष्णुः प्रचोदयात् इति चतुर्विंशाक्षरेण गायत्रीमन्त्रः ॥ ३३ ॥

स्वयमुद्देशसंयुक्तः तदाद्यर्णपुरःसरः ।
स नतिः षडक्षरो मन्त्रो वर्णैरङ्गक्रिया मता ।। ३४ ।।

परशुरामदाशरथिराममन्त्रमाह । स्वयमिति । स्वयं रामश्चतुर्थ्यन्तः तदाद्यवर्णं तु रामिति । पुरस्सरमग्रे यस्य नतिः नमः शब्दः तेन युक्तः । तथाच रां रामाय नमः इति षडक्षरो मन्त्रः । वर्णैः षडङ्गानि ।। ३४ ।।

अङ्गारवर्णमभितोऽण्डबहिःप्रभाभिः
व्याप्तं परश्वधधनुर्धरमेकवीरम् ।
ध्यायेदजेशपुरुहूतमुखैस्तुवद्भि
रावीतमात्मपदवीं प्रतिपादयन्तम् ।। ३५ ।।

ध्यानमाह । अङ्गारवर्णमिति ।। ३५ ।।

श्यामं रवीन्द्वमितदीधितिकान्तियुक्तं
ज्ञानं शरं च दधतं प्रियया समेतं ।
स्वात्मस्वरूपममितं हनुमन्मुखेषु
सन्दर्शयन्तमजितं स्मरोतोरुगीर्भिः ।। ३६ ।।

राघवध्यानमाह । श्याममिति ।। ३६ ।।

निजगोत्रं चु सोद्देशं पूर्वाक्षरपुरस्सरम् ।
नत्यन्तं तारपूर्वं च मनुरष्टाक्षरो मतः ।।
ते च बीजे बीजभूते धर्मादीनामशेषतः ।। ३७ ।।

अपरं परशुराममन्त्रमाह ।। निजगोत्रमिति । निजगोत्रं भार्गवपदं सोद्देशं चतुर्थ्यन्तम् । पूर्वाक्षरं भामिति पुरस्सरमादौ यस्य भार्गवस्य राघवपदं च राघवस्य नत्यन्तं नमोऽन्तं प्रणवपूर्वम् । तथाच ॐ भां भार्गवाय नम इत्यष्टाक्षरोऽयं मन्त्रः । बीजे ते । रां भां इत्येते । बीजभूते । धर्मादीनां बीजभूते । रां राघवाय नमः इति च मन्त्रः ।। ३७ ।।

एते विजयदा मन्त्रा ज्ञानमोक्षप्रदायकाः ।।
हिरण्यरत्नराज्यादिसमभीष्टसुरद्रुमाः ।। ३८ ।।
कृष्णो गोविच्च कामेतः सोद्देशः वल्लवीजनः ।
प्रियश्च तादृशस्वाहायुक्तोऽष्टादशवर्णकः ।।

पदैरङ्गानि सम्प्रीतिकाममोक्षप्रदो मनुः ॥ ३९ ॥

श्रीकृष्णाष्टादशाक्षरमन्त्रमाह । कृष्ण इति । कृष्णश्चतुर्थ्यन्तः गोविन्दोऽपि तथा । गोपीजनवल्लभश्च तादृशः । आदौ कामबीजेन क्लीं इत्यनेनोपेतः । अष्टादशाक्षरोऽयं श्रीकृष्णमहामन्त्रः । तथा च क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहेत्ययं मन्त्राकारः । पदैरेवं पञ्चाङ्गानि ॥ ३९ ॥

ध्यायेद्धरिन्मणिनिभं जगदेकवन्द्यं
सौन्दर्यसारमरिशङ्खवराभयानि ।
दोर्भिर्दधानमजितं सरसं च भैष्मी
सत्यासमेतमखिलप्रदमिन्दिरेशम् ॥ ४० ॥

ध्यानमाह । ध्यायेदिति ॥ ४० ॥

सकामः स्वयमुद्देशी नत्यन्तोऽयं षडक्षरः ।
तदादिरपि सर्वेष्टचिन्तामणिरुदीरितः ॥ ४१ ॥

अपरं षडक्षरं मन्त्रमाह । सकाम इति । सकामः आदौ कामबीजेन युतः स्वयं कृष्णश्चतुर्थ्यन्तः । नत्यन्तः नमोऽन्तः । तथाच क्लीं कृष्णाय नम इति मन्त्राकारः । तदादिः क्लीङ्कारोऽप्येकाक्षरः श्रीकृष्णमन्त्र इति ॥ ४१ ॥

दृष्टार्थ एव मन्त्राणां कलौ वीर्यं तिरस्कृतम् ।
तत्राप्युद्दीप्तवीर्या हि मन्त्रा ह्यत्र प्रकीर्तिताः ॥
वासिष्ठवृष्णिप्रवरमन्त्रास्तत्रापि वीर्यदाः ॥ ४२ ॥

दृष्टार्थः प्रत्यक्षार्थविषयः । वासिष्ठः व्यासः । वृष्णिप्रवरः श्रीकृष्णः ॥ ४२ ॥

स्वयं वेदपदारूढः पूर्ववर्णपुरःसरः ।
नत्यन्तोऽष्टाक्षरो मन्त्रः प्रियो विज्ञानगोपतेः ॥ ४३ ॥
व्याख्याश्रीसर्वविज्ञानकवितादिगुणप्रदः ।
वादे विजयदो नित्यं यथा युद्धे नृकेसरी ॥ ४४ ॥

श्रीवेदव्यासमन्त्रमाह । वेदपदारूढः स्वयं व्यासश्चतुर्थ्यन्तः व्यासपदे पूर्ववर्णो व्या इत्ययं वर्णो बिन्द्वन्तः व्याकारः पुरस्सरः आदौ यस्य सः मन्त्रः । नत्यन्तः नमोऽन्तः । तथा च व्यां वेदव्यासाय नम इत्यष्टाक्षरोऽयं मन्त्रः । विज्ञानगोपतेः विज्ञानभास्करस्य व्यासस्य ॥ ४३-४४ ॥

विज्ञानरोचिःपरिपूरितान्तर्बाह्याण्डकोशं हरितोपलाभम् ।
तर्काभयेतं विधिशर्वपूर्वगीर्वाणविज्ञानदमानतोऽस्मि ॥ ४५ ॥

ध्यानं वक्ति । विज्ञानरोचिरिति । तर्काभयेतं ज्ञानमुद्राभयमुद्रायुतकरयुगम् ॥ ॥ ४५ ॥

ज्ञानानन्दपुरःपूर्णो विद्महे धीमहे तथा ।
तन्नः प्रेरणमध्ये तु व्यासो मन्त्राधिपाधिपः ॥ ४६ ॥

व्यासगायत्रीमाह । ज्ञानानन्देति । ज्ञानानन्दौ पुरः आदौ यस्य पूर्णशब्दस्य चतुर्थ्यन्तम् । पूर्णज्ञानशब्दानन्तरं विद्महे । तदनु पूर्णानन्दायेत्यस्यानन्तरं धीमहीति योज्यम् । 'तन्नः' शब्द 'प्रचोदयादि'ति शब्दयोर्मध्ये व्यासशब्दः प्रथमैकवचनान्तो योज्यः । तथा च सोऽयं पूर्णज्ञानाय विद्महे पूर्णानन्दाय धीमहि । तन्नो व्यासः प्रचोदयात् इति चतुर्विंशत्यक्षरो गायत्रीमन्त्रः । मन्त्रोत्तमोत्तमः ॥ ४६ ॥

आदिबीजं स्थिराशेषज्ञानबीजं विमुक्तिदम् ।
सर्वपापक्षयकरं सर्वव्याधिविनाशनम् ॥ ४७ ॥

आदिबीजम् । व्यासमिति । स्थिरानवद्यज्ञानसाधनम् । सर्वपापहरम् । सर्वव्याधिहरम् । तथा च व्यामित्ययं व्यासैकाक्षरमन्त्र इति ॥ ४७ ॥

ध्यायेच्छशाङ्कशतकोट्यतिसौख्यकान्तिं
संसिच्यमानममृतोरुघटैः सुरेशैः ।
वर्णाभिमानिभिरजेशमुखैः सहैव
पञ्चाशता प्रतिगिरन्तमशेषविद्याः ॥ ४८ ॥

ध्यानमाह । ध्यायेदिति ॥ शशाङ्कानां शतकोटिभ्यः अतिशयितसौख्यकान्तिः यस्य तं । वर्णाभिमानिभिः अजादिभिः ॥ ४८ ॥

सोद्देशस्तु स्वयं दीर्घपूर्वार्णाद्यो नमोयुतः ।
सर्वविद्याप्रदोऽष्टार्णो प्रतिवादिजयप्रदः ॥
विमुक्तिसाधनः कीर्तिबुद्धिस्थैर्यप्रदः सदा ॥ ४९ ॥

अष्टाक्षरहयग्रीवमन्त्रमाह । सोद्देशेति । स्वयं हयग्रीवः सोद्देशः चतुर्थ्यन्तः दीर्घपूर्वार्णाद्यः बिन्दुदीर्घान्तः हकारः आद्यो यस्य मन्त्रस्य स तथा । नमोयुतः नमः शब्दान्तः । तथा च हां हयग्रीवाय नम इत्यष्टाक्षरोऽयं मन्त्रः ॥ ४९ ॥

वन्दे तुरङ्गवदनं शशिबिम्बसंस्थं
चन्द्रावदातममृतात्मकरैः समन्तात् ।
अण्डान्तरं बहिरपि प्रतिभासयन्तं
शङ्खाक्षपुस्तकसुबोधयुताब्जबाहुम् ॥ ५० ॥
नस्तो मुखादपि निरन्तरमुद्गिरन्तं
विद्या अशेषत उताब्जभवेशमुख्यैः ।
संसेव्यमानमतिभक्तिभरावनम्रैः
लक्ष्म्याऽमृतेन सततं परिषिच्यमानम् ॥ ५१ ॥

ध्यानमाह । वन्दे तुरङ्गवदनमिति । द्वाभ्यां नमो नासिकान्तः ॥ ५०-५१ ॥

स्वयमुद्देशवान् पूर्ववर्णपूर्वो नमोयुतः ।
सतारोऽष्टाक्षरश्चैव नवार्णश्च मनू स्मृतौ ॥ ५२ ॥

कपिलदत्तात्रेयमन्त्रावेकश्लोकेन वक्ति । स्वयमिति । स्वयं कपिलदत्तात्रेयशब्दौ सोद्देशौ चतुर्थ्यन्तौ । पूर्ववर्णौ विद्धन्तककारदकारपूर्वौ ययोः अन्ते नमःशब्दोपेतौ । सप्रणवौ । तथा च ॐ कं कपिलाय नमः ॐ दं दत्तात्रेयाय नमः इति मन्त्रौ ॥ ५२ ॥

प्रोद्यद्दिवाकरसमानतनुं सहस्र
सूर्योरुदीधितिभिराप्तसमस्तलोकम् ।
ज्ञानाभयाकिन्तकरं कपिलं च दत्तं
ध्यायेदजादिसमितिं प्रतिबोधयन्तम् ॥ ५३ ॥

युगपदुभयोर्ध्यानमाह । प्रोद्यद्दिवाकर इति । अजादिसमितिं ब्रह्मादिदेवसमुदायं ॥ ५३ ॥

अधृष्यताज्ञानमोक्षप्रदौ भक्तेष्विमौ सदा ।
सूक्तं दीर्घतमोदृष्टं विष्णोर्नुकमिति प्रभोः ॥ ५४ ॥
सर्वार्थदं गार्त्समदं यो जात इति चापरम् ।
वासिष्ठं च परो मात्रयेति ज्ञानविमुक्तिदम् ॥ ५५ ॥

भौवनीयं सर्वकाममोक्षदं य इमेत्यपि ।

एवमेवाखिला वेदा ज्ञातव्या विष्णुतत्पराः ॥ ५६ ॥

दीर्घतमोदृष्टं । दीर्घतमसा ऋषिणा दृष्टं । प्रभोः विष्णोः सूक्तं गार्त्समदं गृत्समदमुनिदृष्टम् । यो जात इत्यादिसूक्तं ॥ वसिष्ठदृष्टं भौवनीयं विश्वकर्मसूक्तं ॥ ५४-५६ ॥

स्वदृष्टं सूक्तमखिलकामदं हरितुष्टिदम् ।

वाचोऽम्भृण्याः श्रियोऽङ्गानि श्रीर्लक्ष्मीर्मेन्दिरा रमा ॥ ५७ ॥

स्वदृष्टं लक्ष्म्या दृष्टं । वाचो वाग्देवतायाः अंभ्रणीसंज्ञायाः श्रियः सूक्तम् । श्रीर्लक्ष्मीर्मेन्दिरा रमा । अङ्गानि पञ्च । श्रिये हृदयाय नम इत्यादि ॥ ५७ ॥

कौशेयपीतवसनामरविन्दनेत्रां

पद्मद्वयाभयवरोद्यतपद्महस्ताम् ।

उद्यच्छतार्कसदृशीं परमाङ्कसंस्थां

ध्यायेद्विधीशनुतपादयुगां जनित्रीम् ॥ ५८ ॥

ध्यानं ब्रूते । कौशेयपीतेति ॥ ५८ ॥

लज्जाबीजं च तद्बीजं तस्या एवाभिधायकम् ।

पाशाङ्कुशौ रक्तवस्त्रं लज्जाबीजे विशिष्यते ॥ ५९ ॥

अमध्ययुग्मस्वरगं तेनैवाङ्गमुदाहृतम् ।

लक्ष्म्याः एकाक्षरमन्त्रमाह । लज्जाबीजमिति । लज्जा ह्रीः । तद्बीजं ह्रीं इति तस्याः श्रियः बीजं श्रीमिति मन्त्रद्वयम् । तस्याः लक्ष्म्याः एवाभिधायकम् । वाचकम् । अम्भृणीमन्त्रे कौशेयपीतवसनामित्युक्तम् । लज्जाबीजाख्ये तु मन्त्रे रक्तवस्त्रा ध्येया । अभयवरस्थाने पाशाङ्कुशौ ध्येयाविति विशेषः । अमध्येति । अमध्येति । मध्यस्वरयुग्मं ऋलृकारौ तद्वर्जदीर्घबिन्द्वन्तस्वरोपेतेन ह्रींकारेणैव षडङ्गानि । ह्रां हृदयाय नमः । ह्रीं शिरसे स्वाहा । ह्रूं शिखायै वौषट् । ह्रैं कवचाय हुम् । ह्रौं नेत्राभ्यां वौषट् । ह्रः अस्त्राय फट् इत्यङ्गन्यासप्रकारः ॥ ५९ ॥

सत्ताबीजं च दुर्बीजं तद्वदेव प्रकीर्तितम् ॥ ६० ॥

वर्णः श्यामो विशेषोऽत्र ताम्बूलं नीलमुत्पलम् ।
चक्रशङ्खौ तर्जनं च शूलमित्यपरत्र च ॥ ६१ ॥

मन्त्रान्तरमाह । सत्तेति । सत्ताबीजं भूरिति । दुर्बीजं दुः दुर्गायाः बीजं दुरिति । तद्वत् मन्त्रद्वयमिति । पूर्वत्र उद्यच्छतार्कसदृशीमित्युक्तम् । इह तु श्यामो वर्णो ध्येयः । अभयवरस्थाने ताम्बूलनीलोत्पले ध्येये । इति बीजे विशेषः । अपरत्र दुर्गाबीजे श्यामो वर्णो भुजचतुष्टये क्रमेण चक्रशङ्खौ तर्जनं त्रिशूलं च ध्येयमिति विशेषः ॥ ६०-६१ ॥

नमोऽन्तः स्वेन सहितः तदेवान्यो मनुः स्मृतः ।
दुर्गात्रिष्टुप् कश्यपोक्ता तत्र वर्णोऽग्निवत्स्मृतः ॥ ६२ ॥

मन्त्रान्तरमाह । नमोऽन्तस्स्वेनेति । नम इत्यन्तः स्वं यस्य चतुर्थ्यन्तदुर्गापदस्य । तेन सहितं दुर्गाबीजं । ततश्च दुः दुर्गायै नमः इति षडक्षरोऽन्यो मन्त्र इति । दुर्गाख्या श्रीरत्र देवता ज्ञेया । दुर्गा त्रिष्टुप् जातवेदसे सुनवाम सोमेत्यादिका । कश्यपोक्ता कश्यपोऽत्र ऋषिरित्यर्थः । तत्र अग्निवर्णा दुर्गा ध्येया* ॥ ६२ ॥

त्रिनेत्रत्वं च दुर्गायाः प्रायः सर्वत्र कथ्यते ।
पादैः समस्तेन तथा षडर्णेनाङ्गमुच्यते ॥ ६३ ॥

सर्वत्र सर्वेषु दुर्गामन्त्रेषु पादैः व्यस्तैः समस्तेन च अङ्गानि नय्सनीयानि । षड्वर्णेन दुर्गामन्त्रेण षडङ्गं न्यसनीयमिति ॥ ६३ ॥

रमाया एव रूपाणि त्वेतानि हि विदो विदुः ।
मुख्यतो जामदग्न्यस्तु देवताऽस्य मनोः स्मृतः ॥ ६४ ॥

एतानि श्रीभूदुर्गाख्यानि रमाया एव रूपाणि इति ज्ञानिनो विदुः जानन्ति । मुख्यतस्तु जातवेदस इति मन्त्रस्य जामदग्न्य एव देवता ॥ ६४ ॥

हिरण्यगर्भसूक्तं च भृगुदृष्टं प्रकीर्तितम् ।
ब्रह्मधातृविरिंचाजपाद्यैरङ्गमुदाहृतम् ॥ ६५ ॥

हिरण्यगर्भसूक्तं चेति । हिरण्यगर्भः समवर्तताग्रे इत्यादिभृगुणा दृष्टं ब्रह्मणो मन्त्र इति । ब्रह्मधातृविरिञ्चाजपाद्यैः अङ्गानि ॥ ६५ ॥

*अत्र भूः भुवे नमः इति पञ्चाक्षरभूमन्त्रः लेखकप्रमादात् मूलकोशेऽनुपलब्धः ।

ध्यायेन्निषण्णमजमच्युतनाभिपद्मे
प्रोद्यद्दिवाकरसमूहनिकाशमग्रयम् ।
मातृप्रकारकरमुत्तमकान्तिमद्भिः
वक्त्रैः सृजन्तमखिलैः परमार्थविद्याम् ।। ६६ ।।

ध्यानमाह । ध्यायेदिति । मातृप्रकाराः पद्मद्वयाभयेत्याद्युक्तप्रकाररमाकरसदृशाः करा यस्येति । वा मातृप्रकारकिरणं उद्यच्छतार्कसदृशमित्यर्थः । मातृप्रकाराः निर्माणप्रकाराः सृजत्प्रकाराः कराः यस्येति वा तं ।। ६६ ।।

स्वयमुद्देशनतिमांस्तस्य पंचाक्षरो मनुः ।
स्वयमेवापरोऽष्टार्णस्तादृशः संप्रकीर्तितः ।। ६७ ।।

स्वयं ब्रह्मशब्दः उद्देशनतिमान् । चतुर्थी नमःशब्दोपेतः पञ्चाक्षरः । स्वयं हि हिरण्यगर्भः तादृशः । चतुर्थीनमयुतोऽष्टाक्षरः । (तथाच) ब्रह्मणे नमः हिरण्यगर्भाय नम इति पञ्चाष्टाक्षरौ* ।। ६७ ।।

बळाद्यं भृगुणा दृष्टं प्राणाग्नेः सूक्तमुच्यते ।
प्राणाद्यैः पंचभिस्तस्याप्यङ्गान्युक्तानि सूरिभिः ।। ६८ ।।

मुख्यप्राणमन्त्रमाह । बळाद्यमिति । बळित्थेत्यादि । प्राणादिपञ्चकेन अङ्गपञ्चकम् ।। ६८ ।।

उद्यद्रविप्रकरसन्निभमच्युताङ्के
स्वासीनमस्य नुतिनित्यवचःप्रवृत्तिम् ।
ध्यायेद्गदाभयकरं सुकृताञ्जलिं तं
प्राणं यथेष्टतनुमुन्नतकर्मशक्तिम् ।। ६९ ।।

ध्यानमाह । उद्यद्रवीति ।। ६९ ।।

प्राणाद्याः पंच मन्त्राश्च तस्य देवस्य वाचकाः ।
उच्यते हरिरप्येतैः साक्षान्नारायणादिकः ।। ७० ।।

प्राणाद्याः प्राणाय नमः अपानाय नमः इत्याद्याः । एतैर्मन्त्रैर्मुख्यतः साक्षान्नारायणएवोच्यते ।। ७० ।।

---

*मन्त्रौ इति स्यात् ।

ब्रह्माद्या अपि भारत्या गौरीर्यस्त इति श्रुतौ ।
मन्त्रौ दीर्घतमोदृष्टौ सर्वाभीष्टप्रदायकौ ॥ ७१ ॥

ब्रह्माण्याः भारत्याश्च गौरीर्मिमायेत्यादि । यस्ते स्तनः शशयो योमयो भूरित्यादि द्वौ मन्त्रौ दीर्घतमसा दृष्टौ ॥ ७१ ॥

उद्यद्दिवाकरसमूहनिभां स्वभर्तु
रङ्कस्थितां अभयसद्धरबाहुयुग्माम् ।
मुद्रां च तत्वदृशये वरपुस्तकं च
दोर्युग्मकेन दधतीं स्मरताऽऽत्मविद्याम् ॥ ७२ ॥

ध्यानमाह । उद्यद्दिवाकरेति ॥ ७२ ॥

पादैर्व्यस्तैः समस्तैश्च तदङ्गानि विदो विदुः ।
स्वयमुद्देशनत्यन्तौ मन्त्रौ द्वावपरौ तयोः ॥ ७३ ॥

पादैः व्यस्तैः समस्तैः अङ्गानि कल्प्यानि । ब्रह्माणीभारत्योश्च मन्त्रान्तराण्याह । स्वयमिति । स्वयं ब्रह्मा चतुर्थ्यन्तो नमोऽन्तश्च हिरण्यगर्भश्चतुर्थ्यन्तो नमोऽन्तश्च ब्रह्माणी भारत्योश्च चतुर्थ्यन्ते नमोऽन्ते च इति मन्त्रचतुष्टयम् । ब्रह्माण्यै नमः । हिरण्यगर्भायै नमः । सरस्वत्यै नमः । भारत्यै नमः इति मन्त्रक्रमः । सच सच तौ । सा चा सा च ते । तयोरिति तन्त्रेण पुल्लिङ्गस्त्रीलिङ्गयोरुपादानम् ॥ ७३ ॥

मन्त्रा एते हरिप्रीतिदायकाः सर्वकामदाः ।
इष्टं दैवं हरिः साक्षाल्लक्ष्मीर्भाग्यस्य देवता ॥
गुरुर्ब्रह्माऽथ वायुर्वा विद्या देव्यौ प्रकीर्तिते ॥ ७४ ॥
तस्मादेते प्रिया विष्णोरन्तरङ्गतया सदा ।
ज्ञेयाश्चैव प्रपूज्याश्च विष्णोः प्रीतिमभीप्सता ॥ ७५ ॥

ननु वैष्णवानां किमन्यैः प्रयोजनमित्याशङ्क्याह । मन्त्रा एत इति सार्धद्वयेन ॥ ७४-७५ ॥

उद्देशनतियुङ्मन्त्रः स्वयमेव शिवस्य तु ।
वर्णैरेतैस्तदङ्गानि वामदेवो मुनिः स्मृतः ॥ ७६ ॥
पङ्क्तिशब्दार्थविज्ञाने नहि च्छन्दसि संशयः ।

शिवपञ्चाक्षरमन्त्रमाह । चतुर्थ्यन्तः शिवः नतिः नमः शब्दस्तेन युतः । तथा च शिवाय नम इति मन्त्रः । वर्णैः पञ्चाङ्गानि । वामदेव ऋषिः पङ्क्तिश्छन्दः ॥ ७६ ॥

ध्येयः पञ्चमुखो रुद्रः स्फटिकामलकान्तिमान् ॥ ७७ ॥
विद्युच्छुभ्रासितरजःश्यामान्यस्य मुखानि तु ।
जटाबद्धेन्दुकलः प्रियायुङ्नागभूषणः ॥ ७८ ॥

ध्यानमाह। पञ्चमुख इति। विद्युच्छुभ्रासितजटः[१]। विद्युत इव द्योतमानजटाकलापः ॥ ७७-७८ ॥

मन्त्रेष्वेतेषु सर्वेषु वाच्यास्तारेण केशवः ।
अन्तर्यामितया ध्येयः सर्वदेवेषु सर्वदा ॥ ७९ ॥

एतेषु लक्ष्म्यादिमन्त्रेषु तारेण प्रणवेन केशव एव वाच्यः । अन्तर्यामितया सर्वदेवेषु सर्वदा ध्येयः ॥ ७९ ॥

स एव वनितालिङ्गः पार्वत्या मनुरुच्यते ।
गौरी वराभयकरा ध्येया पीताम्बरा च सा ॥ ८० ॥

स एव वनितालिङ्गः स्त्रीलिङ्गः चतुर्थ्यन्तशिवाशब्दः । नमोऽन्तः पार्वतीमन्त्रः । शिवायै नम इति तदाकारः । ध्यानमाह । गौरीति ॥ ८० ॥

स्वयमुद्देशनत्यन्तः पूर्वपूर्वः षडक्षरः ।
सनत्कुमारदृष्टोऽयं मनुः शेषस्य कामदः ॥ ८१ ॥

शेषमन्त्रमाह । स्वयमिति । उद्देशश्चतुर्थी । नतिर्नमः शब्दः तद्युक्तः । स्वयं शेषः पूर्वपूर्वः पूर्वाक्षरं बिन्द्वन्तं पूर्वं यस्य स तथा । सोऽयं शें शेषाय नम इति षडक्षरः सनत्कुमारेण दृष्टः शेषस्य मन्त्रः ॥ ८१ ॥

दधानो हलसौनन्दौ श्वेतवर्णः कृताञ्जलिः ।
सहस्रमूर्धाऽद्वितीयकर्णभूषः प्रियायुतः ।
वनमाली नीलवासा ध्ययो विष्णोस्तु पृष्ठतः ॥ ८२ ॥

ध्यानमाह दधान इति । हलसौनन्दौ हलमुसले । अद्वितीयकर्णभूषः एककुण्डलः ॥ ८२ ॥

व्यत्यस्तपक्षितारौ च स्वाहान्तो गारुडो मनुः ।
काश्यपोऽस्य मुनिर्ध्येयः सुधापूर्णं हिरण्मयम् ॥ ८३ ॥

अनेन मूले रज इत्यस्य स्थाने जट इति पाठान्तरम् । जट इत्यन्तं भिन्नं पदं चेति द्योत्यते

पञ्चाक्षरगरुडमन्त्रमाह। व्यत्यस्तेति। विपरूतः पक्षिशब्दः आदौ प्रणवः स्वाहान्तो गरुडमन्त्रः। ॐ क्षिपस्वाहेति तदाकारः। अस्य कश्यपो मुनिः। ध्यानं सुधापूर्णमिति ॥ ८३ ॥

दधानः कुम्भमभयं पीतशुक्लारुणो हरिः।
कृष्णाश्चाऽजानुतो नाभेः कण्ठात्या दन्त एव च ॥ ८४ ॥
प्रियायुक् पुरतो विष्णोः पक्षतुण्डसमन्वितः।
जङ्गमस्थावरविषहृदयं सर्वकामदः ॥ ८५ ॥

आजानुत इति। पादमारभ्य जानुपर्यन्तं पीतवर्णः। ततः नाभिपर्यन्तं शुक्लः। ततः कण्ठपर्यन्तं अरुणः। ततः मस्तकपर्यन्तं हरिद्वर्णः। ततः मस्तके कृष्णवर्ण इत्यर्थः ॥ ८४-८५ ॥

मन्त्राश्च लोकपालानां नमोऽन्ताः सर्वकामदाः।
नीलरक्तासितश्वेतरक्तशुक्लाश्च वर्णतः ॥ ८६ ॥
सप्रियाः साभया वज्रशक्तिदण्डासिपाशिनः।
गदाकुमुदशूलेष्टखड्गिनो भूषणोज्वलाः ॥ ८७ ॥

लोकपालानां इन्द्रादीनां नमोऽन्ताः मन्त्राः इन्द्राय नमः। इन्द्रादयः क्रमेण नीलादिवर्णाः। तत्र वायुसोमेशानब्रह्मशेषाः शुक्लाः। वज्राद्यायुधोपेताश्च ध्येयाः। तत्र लं इन्द्राय नमः। यं वायवे नमः। सं सोमाय नमः। शं ईशानाय नमः। इत्येते इन्द्रादीनां मन्त्राः ॥ ८६-८७ ॥

अग्निश्च स्वयमुद्देशी सनमः स्कन्दवाचकः।
कौशिकोऽस्य मुनिर्वह्निवर्णः षण्मुख उज्वलः ॥
धनुःशक्तिधरो ध्येयः कामदो भयनाशनः ॥ ८८ ॥

स्कन्दमन्त्रमाह। अग्निश्चेति। अग्निः अग्निबीजं रमिति। उद्देशः चतुर्थ्यन्तः। स्वयं स्कन्दः। नमोऽन्तः। तथाच रं स्कन्दाय नमः इति स्कन्दषडक्षरमन्त्रः। ऋषिं ध्यानं चाह। कौशिकेति ॥ ८८ ॥

ह्रस्वः कृपालुः सेतश्च स्वयमन्यः स्वयं तथा।
सतारोऽष्टाक्षरः सौरः क्रमव्युत्क्रमतः पदैः ॥ ८९ ॥

अङ्गानि, पद्मयुगळधरो ध्येयोऽरुणो रविः ।
सर्वव्याधिहरः श्रीदो वृष्टिदोऽयं मनुः स्मृतः ॥ ९० ॥

सौरमन्त्रमाह । ह्रस्व इति । कृपालुशब्देन घृणी कथ्यते । (कृपालुशब्दः घृणीशब्दः) असौ ह्रस्वश्चेत् घृणि इति भवति । सेतः सविसर्गः । स्वयं सूर्यः । स्वयं अन्यः आदित्यः सतारः आदौ प्रणवयुतः । तथाच ॐ घृणिः सूर्य आदित्य इति सूर्याष्टाक्षरमन्त्रः । क्रमव्युत्क्रमाभ्यां पादैरङ्गानि । ध्यानं तु पद्मयुगलेत्यादि ॥ ८९-९० ॥

मोनयदासाप्रप्रक्षि व्यत्यस्तो विघ्नराण्मनुः ।
रक्ताम्बरो रक्ततनुः रक्तमाल्यानुलेपनः ॥ ९१ ॥
लम्बोदरो गजमुखः पाशदन्ताङ्कुशाभये ।
बिभ्रध्येयो विघ्नहरः कामदस्त्वरया ह्ययम् ॥ ९२ ॥

गणेशमन्त्रमाह । मोनयदासाप्रप्रक्षीति । व्यत्यस्तो विपरीताक्षरः नमोऽन्तश्च । तथा च क्षिप्रप्रसादाय नम इत्यष्टाक्षरो विघ्नराजमन्त्रः । ध्यानं रक्ताम्बर इति ॥ ९१-९२ ॥

तत्र तत्र स्थितो विष्णुस्तत्तच्छक्तीः प्रबोधयन् ।
एक एव महाशक्तिः कुरुते सर्वमञ्जसा ॥ ९३ ॥

अन्यदेवेष्वपि विष्णुरेव फलद इत्याह ॥ तत्र तत्रेति ॥ ९३ ॥

स्वयमुद्देशवान् पूर्ववर्णपूर्वो नमोयुतः ।
धान्वन्तरो महामन्त्रः संसृतिव्याधिनाशनः ॥ ९४ ॥

धन्वन्तरिमन्त्रमाह । स्वयं धन्वन्तरिः उद्देशवान् चतुर्थ्यन्तः । वर्णपूर्वः बिन्द्वन्तधकारादिः । हृदये नमः शब्देन युतः । तथा च धं धन्वन्तरये नम इति अष्टाक्षरो धन्वन्तरिमन्त्रः ॥ ९४ ॥

चन्द्रौघकान्तिममृतोरुकरैर्जगन्ति
संजीवयन्तममितात्मसुखं परेशम् ।
ज्ञानं सुधाकलशमेव च सन्दधानं
शीतांशुमण्डलगतं स्मरतात्मसंस्थम् ॥ ९५ ॥

मूर्ध्नि स्थितादमुत एव सुधां स्रवन्तीं
भ्रूमध्यगाच्च तत एव च तालुसंस्थात् ।
हार्दाच्च नाभिसदनादधरस्थिताच्च
ध्यात्वाऽभिपूरिततनुर्दुरितं निहन्यात् ॥ ९६ ॥
अज्ञानदुःखभयरोगमहाविषाणि
योगोऽयमाशु विनिहन्ति सुखं च दद्यात् ।
उन्मादविभ्रमहरः परतश्च सान्द्र[1]
मानन्दमेव पदमापयति स्म नित्यं ॥ ९७ ॥
ध्यात्वैव हस्ततलगं स्वमृतं स्रवन्तं
देवं स यस्य शिरसि स्वकरं निधाय ।
आवर्तयेन्मनुमिमं स च वीतरोगः
पापादपैति मनसा यदि भक्तिनम्रः ॥ ९८ ॥

ध्यानमाह चन्द्रौघेति त्रिभिः ॥ ९५-९८ ॥

शतं सहस्रमयुतं लक्षं वाऽऽरोगसंक्षयात् ।
इममेव जपेन्मन्त्रं साधूनां दुःखशान्तये ॥ ९९ ॥

रोगसङ्क्षयमुद्दिश्य ॥ ९९ ॥

ज्वरदाहादिशान्त्यर्थं तर्पयेन्मनुनाऽमुना ।
ध्यात्वा हरिं जले सप्तरात्राज्जूर्तिर्विनश्यति ॥ १०० ॥

जूर्तिः ज्वरः ॥ १०० ॥

अयुतामृतसमिद्धोमाद्धोघृतक्षीरसंयुतात् ।
सर्वरोगा विनश्यन्ति विमुखो न हरेर्यदि ॥ १०१ ॥

अयुतेति । अमृता गुडूची । तत्समिद्धोमात् अयुतसङ्ख्यात् ॥ १०१ ॥

भूताभिचारशान्त्यर्थमपामार्गहुतिक्रिया ।
द्विगुणाऽमृतया पश्चात्केवलेन घृतेन वा ॥ १०२ ॥

---

१. सान्द्रं स्वानन्दं ।

आयुर्विवृद्धये नित्यं जन्मनक्षत्र एव वा ।
चतुश्चतुर्भिर्दूर्वाभिः क्षीराज्याक्ताभिरिष्यते ॥ १०३ ॥
सर्वक्रिया हरौ भक्ते हरिभक्तैः स्वनुष्ठिताः ।
गुरुभक्तैः सदाचारैः फलं त्वद्धा न चान्यथा ॥ १०४ ॥

अपामार्गाहुतिक्रिया अपामार्ग(उत्तराणि)समिद्धोमरूपा क्रिया। अमृतसमिद्भिगुणया ॥ १०२-१०४ ॥

ब्रह्मान्ता गुरवश्चैव सम्प्रदायप्रवर्तकाः ।
तत्तद्गुणानुसारेण पूज्या ध्येयाश्च कृत्स्नशः ॥ १०५ ॥
सर्वेभ्योऽभ्यधिका भक्तिर्विष्णौ स्यादतिनिश्चला ।
लक्ष्मीर्ब्रह्मादिषु ततः क्रमेण स्यात्सुभाविता ॥
एवं विद्याः फलिष्यन्ति नान्यथा तु कथञ्चन ॥ १०६ ॥
शुभान्ध्यायन्ति ये कामान् गुरुदेवप्रसादजान् ।
इतरानात्मपापोत्थांस्तेषां विद्या फलिष्यति ॥ १०७ ॥

ब्रह्मान्ता इति । स्वगुरुमारभ्य ब्रह्मपर्यन्ताः ॥ १०५-१०७ ॥

मुक्तावपि च संसारे नाऽत्मनो विष्णुतां क्वचित् ।
ब्रह्मरुद्रादिभावं वा साम्यं वाऽऽधिक्यमेव वा ॥ १०८ ॥
अतद्वशत्वमथवा यः स्मरेत्स तु सिद्धिभाक् ।
नान्यथा सिद्धिमाप्नोति कल्पकोटिशतैरपि ॥ १०९ ॥

मुक्तौ संसारेऽपि आत्मनो विष्णुत्वादिकं न स्मरेदिति सम्बन्धः ॥ १०८-१०९

स्मृत्वा गुरुं पूर्वगुरुं आदिमूलगुरूंस्तथा ।
देवतां वासुदेवं च विद्याभ्यासी तु सिद्धिभाक् ॥ ११० ॥
अवज्ञाता गुरूणां च देवतानां न सिध्यति ।
प्रयाति च तमो घोरं मन्त्रावज्ञाकृदेव च ॥ १११ ॥
यस्तारतम्यवेत्ता स्याद्गुरूणां देवतास्वपि ।
भक्तिमान् गुरुदेवेषु तद्भक्तेषु च सिध्यति ॥ ११२ ॥

गुरुदेवप्रतीपानां विमुखस्तत्प्रिये रतः ।
अकामक्रोधलोभश्च नचिरात्सिद्धिमाप्नुयात् ॥ ११३ ॥
सकामेभ्योऽमितगुणा [१]याऽकामैस्तु कृता क्रिया ।
तस्मादकाम एवालं भजेद्विष्णुं सनातनम् ॥ ११४ ॥

स्मृत्वेति । गुरुं मन्त्रोपदेष्टारं पूर्वगुरून् । परमगुर्वादीन् । आदिगुरुः पूर्णप्रज्ञः । मूलगुरुः वेदव्यासः । वासुदेवाख्यं च देवतां स्मृत्वा विद्याभ्यासी मन्त्रजापकः सिद्धिं प्राप्नोति । यदा यन्मन्त्रजपः क्रियते तदा तद्देवतानमस्कारः अन्ते कर्तव्य इति सम्प्रदायविदः ॥ ११०-११४ ॥

अयं मे हस्त इति च मन्त्रः पूर्वोक्तवत्स्मृतः ।
अत्रोक्तास्तु क्रियाः पूर्वमन्त्रेष्वप्युपलक्षणम् ॥ ११५ ॥

अयं मे हस्त इति वेदमन्त्रः । पूर्वोक्तवत् धन्वन्तरिमन्त्रवदेव स्मृतः । अत्र धन्वन्तरिमन्त्रे उक्तहोमादिक्रियाः पूर्वमन्त्रेष्वपि बोद्धव्याः ॥ ११५ ॥

विजयस्तम्भनादीनि नारसिंहैर्विशेषतः ।
जामदग्न्यैश्च कार्याणि राघवैर्यादवैरपि ।
वाराहैः स्तम्भनं क्षिप्रं श्रीकराः कथिताः पुरा ॥ ११६ ॥
बहुबाहुं महाकायमुद्युक्तं चोद्यतायुधम् ।
स्मरन् विजयमाप्नोति स्तम्भनादींश्च कारयेत् ॥ ११७ ॥
वसुपूर्णकरं रत्नपर्वतस्थं विभावयन् ।
वसुसिद्धिमवाप्नोति सेव्यमानमजादिभिः ।
श्रिया विभूतिभिर्युक्तं भावयन् भूतिमाप्नुयात् ॥ ११८ ॥
यद्यन्मनोगतं तस्य तत्तदाप्नोत्यसंशयम् ।
तथा तथा हरिं ध्यायन् क्रियास्तास्ताश्च साधयन् ॥ ११९ ॥

प्रयोगविशेषे मन्त्रविशेषमाह ॥ विजयस्तम्भनादीनीति ॥ ११६-११९ ॥

१.पा-ह्यकामैः।

श्रिये पद्मानि जुहुयात्सम्प्रीत्या उत्पलानि च ।
सरान् जयाय जुहुयादभिमन्त्र्य प्रयोजयेत् ।। १२० ।।
विद्यायै मन्त्रितं वारि वचां वा तुळसीमपि ।
ब्राह्मीं घृतं सुवर्णं वा शतावृत्त्या तु नित्यशः ।। १२१ ।।

होमप्रयोगमाह । श्रियै उत्पलानि । जयाय जयार्थं शरान् शरप्रकृतितृणसमिधः अभिमन्त्र्य शरान् शत्रवे प्रयोजयेत् ।। १२०-१२१ ।।

अकुर्वंश्च क्रिया भक्त्या निरपेक्षो भजन् हरिं ।
सर्वमेतदवाप्नोति विशेषेण न संशयः ।। १२२ ।।

क्रिया होमाद्या अकुर्वन् निरपेक्षो हरिं भजन् सर्वं आप्नोति ।। १२२ ।।

सृष्टिस्थितिलयन्यासाः प्रतिलोमानुलोमतः ।
स्थित्यन्ता एव वर्णानां श्रेष्ठा एव चतुर्दश ।।
संहृत्यन्ता मोक्षिणां तु एकविंशतिरेव वा ।। १२३ ।।

तत्त्वन्यासादिषु प्रकारभेदमाह। सृष्टीति। स्थित्यन्ता एव वर्णानां ब्राह्मणादीनां। यतिव्यतिरिक्तानां न्यासाः श्रेष्ठाः। ते च चतुर्दशवारं कर्तव्याः। संहृत्यन्ताः संहारान्ताः न्यासाः मोक्षिणां सन्न्यासिनां एते च एकविंशतिवारं कर्तव्याः इत्यर्थः ।। १२३ ।।

पादहृत्केषु नाभ्यास्ययुतं च सललाटकम् ।
सनासिकादृग्जान्वोश्च सश्रोत्रं सोरुकं तथा ।। १२४ ।।
सोरस्यं च सकण्ठं च सभुजद्वयमेव च ।
सगण्डयुग्मं साळीकं सतुन्दं क्रोडकं तथा ।। १२५ ।।
समूलं च सगुह्यं च सपार्श्वद्वयमेव च ।
सदोर्द्वयं व्यापकं च गळपार्श्वद्वयेन च ।। १२६ ।।
ककुत्स्तनद्वयेनापि पृष्ठमूलेन सर्वशः ।
न्यासो यथाक्रमं प्रोक्तो मन्त्रेष्वेतेषु कृत्स्नशः ।
प्रतिमायामात्मनि च न्यासोऽयं सन्निधानकृत् ।। १२७ ।।

अत्रोक्तमन्त्राणां न्यासस्थानमाह। पादेति। एतेषु मन्त्रेषु यथाक्रमं मन्त्रवर्मक्रमेण स्थानक्रम इत्यर्थः । न्यासफलमाह । प्रतिमायामिति ।। १२४-१२७ ।।

बीजान्तःसाध्यमध्यं च विभक्तदलमन्त्रयुक् ।
वर्णानुप्रतिलोमेतं[1] वृत्तं भूपुरसंयुतम् ॥
बीजसंदृब्धकोणं च यन्त्रं रक्षादिसाधकम् ॥ १२८ ॥
समं तत्सर्वमन्त्रेषु जप्तं धार्यं तु वा भुवि ।
विलिख्य मण्डले वा तत्पूजयेद्धरिमञ्जसा ॥ १२९ ॥

यन्त्रलेखनप्रकारमाह । बीजान्तमिति । अयमर्थः । यो मन्त्रः यावद्वर्णः तावद्दलं पद्मं लिखित्वा पद्ममध्ये बीजं लिखित्वा बीजान्तराले साध्यं लिखेत् । दलेषु मन्त्रवर्णान् लिखेत् । बाह्यतो भूपुरं चतुरस्रं लिखित्वा भूपुरकोणेषु दिक्पालबीजानि लिखित्वा तत्र हरिं पूजयेत् ॥ १२८-१२९ ॥

प्रतिमोक्तलक्षणैर्यावद्युक्त आचार्य उत्तमः ।
सर्ववित्तपसा युक्त आज्ञासक्तियुतो हरेः ॥ १३० ॥
यावद्भक्तो यथालब्धैर्गुणैर्युक्तो हि वैष्णवः ।
गुरुः सत्सम्प्रदायज्ञस्तारतम्येन सिद्धिदः ॥ १३१ ॥
उत्तमादुत्तमा सिद्धिर्धर्ममोक्षादिषु स्फुटा ।
तस्मादुत्तम आचार्ये लब्धे नातोऽवरं व्रजेत् ॥ १३२ ॥
एकस्य शिष्यतां प्राप्य तदाज्ञां न विना समम् ।
अवरं वा व्रजेदुच्चगुणश्चेनैव दुष्यति ॥ १३३ ॥
विशेषतो गुणश्च स्याद्देवेष्वेवमेव हि ।
तस्मादुत्तममाचार्यं देवेशं चाऽऽश्रयेद्धरिम् ॥ १३४ ॥

गुरुलक्षणमाह । प्रतिमोक्तलक्षणैरिति ॥ १३०-१३४ ॥

अपरोक्षदृशेरेव यस्मान्मोक्षो न चान्यथा ।
अपरोक्षदृशिश्चैव श्रवणान्मननदनु ॥
सम्यङ्निश्चिततत्वस्य निदिध्यासनया भवेत् ॥ १३५ ॥

इदानीं परमसाधनरहस्यमाह ॥ अपरोक्षेति ॥ १३५ ॥

१.वर्णानुप्रातिलोम्येन

द्विविधा सा च संप्रोक्ता विष्णुशास्त्रावमर्शनम् ।
एकं ध्यानं हरेरन्यच्चत्वार्यङ्गानि तत्र च ।
यमश्च नियमश्चाऽसा प्राणायाम इतीरितः ॥ १३६ ॥

सा निदिध्यासना द्विविधा । विष्णुशास्त्रविमर्शनं ध्यानं च । तत्र ध्याने चत्वारि यमादीनि अङ्गानि ॥ १३६ ॥

अहिंसा सत्यमस्तेयं ब्रह्मचर्यपरिग्रहौ ।
यमाः शौचं तपस्तुष्टिः स्वाध्यायो हरिपूजनम् ॥
नियामा वीरपद्मे च स्वस्तिकाद्यानि चासनम् ॥ १३७ ॥
रेचकः पूरकश्चैव कुम्भकश्च त्रिधा स्मृतः ।
प्राणायामः स्मृतिं विष्णोर्विना नियम उच्यते ॥१३८ ॥
अधीतिः स्मृतियुक्ता तु निदिध्यासनमेव हि ।
प्राणायामेऽपि विष्णोर्यत्स्मरणं ध्यानमेव तत् ॥ १३९ ॥
आसा शौचं प्राणायामो निष्परिग्रहपूर्वकाः ।
तप आद्याः क्रमात्सर्व उत्तरोत्तरतोऽधिकाः ॥ १४० ॥

यमादिलक्षणमाह । अहिंसेति । आसनान्याह । वीरेति । स्वस्तिकाद्यानीति ॥ आद्यपदेन मयूरगरुडासनादीनि गृह्यन्ते ॥ १३७-१४० ॥

सर्वस्माच्छ्रवणाद्यास्तु मुख्या मुक्तिप्रसाधने ।
अज्ञस्य श्रवणं श्रेष्ठमयुक्तेर्मननं तथा ॥
ध्यानं निश्चिततत्वस्य तस्माच्छास्त्रावमर्शनम् ॥ १४१ ॥
वरं दशगुणं तस्माद्व्याख्यैकस्य शतोत्तरा ।
अपरोक्षदृशाऽप्येषा कर्तव्या विष्णुतुष्टिदा ॥ १४२ ॥

साधनादिषु तारतम्यमाह । मुक्तिप्रसाधने मोक्षसाधनविषये श्रवममननिदिध्यासनानि मुख्यसाधनानीत्यर्थः । श्रवणादिष्वधिकारिभेदमाह । अज्ञस्येति । प्रवचनाशक्तस्य अनिश्चयवतः । तस्मात् ध्यानात् । शास्त्रावमर्शनं विष्णुशास्त्रविचारः दशगुणाधिकः । ततोऽपि एकस्यापि भगवद्गुणस्य एकस्य सच्छिष्यस्य व्याख्या व्याख्यानं शतगुणाधिकं । ज्ञानिनाऽपि कर्तव्यं विष्णुतोषाय एव ॥ १४१-१४२ ॥

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ १४३ ॥
न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ १४४ ॥

स्वसाधनरहस्यस्य हरिभक्तान् प्रत्यभिधाने फलविशेषं गीतावाक्येनाह ॥ य इममिति ॥ १४३-१४४ ॥

शौचासने त्वङ्गमात्रं न पृथग्धर्मकारणम् ।
प्राणायामादयस्तुष्टिपर्यन्ता द्विगुमाधिकाः ॥ १४५ ॥
स्वाध्यायोऽतः कोटिगुणस्ततोऽनन्तगुणा हरेः ।
पूजाऽतस्त्रिगुणं ध्यानमिति धर्मक्रमः स्मृतः ॥ १४६ ॥

शौचेति। शौचासने दृष्टार्थे ध्यानाङ्गे। प्राणायामादय इति। प्राणायामाहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहतपस्तुष्टिपर्यन्ताः क्रमेण द्विगुणाधिकाः । स्वाध्यायोऽतः तुष्टेः कोटिगुणः। ततः स्वाध्यायात् हरेः पूजाऽनन्तगुणिता। तद्विगुणं ध्यानमिति धर्मक्रमः ॥ १४५-१४६ ॥

ऊर्वोरधः पदोरूर्ध्वं विभागेनेति च त्रिधा ।
आसनत्रयमुद्दिष्टं मन्त्रस्मरणपूर्वकम् ॥ १४७ ॥
द्विगुणोत्तरं रेचकादि षोडशादिक्रमेण तु ।
मात्राणां ह्रस्ववर्णस्य कालो मात्रेति शब्द्यते ॥ १४८ ॥
क्रमेणैवाभ्यसेन्मात्रावृद्धिमेकाग्रधीः पुनः ।
रेचयित्वा दक्षिणतः पूरयित्वा तु वामतः ॥
कुम्भकश्च सुषुम्नायां विष्णुं वायुं च संस्मरेत् ॥ १४९ ॥

इदानीमासनप्रकारमाह । ऊर्वोरिति । ऊर्वोरधः पादौ निधायेत्येकमासनं । ऊर्वोरूर्ध्वं पदोः पादयोः अवस्थापने द्वितीयम्। विभागेन एकपादं उरोरधः एकं अन्यस्य ऊरोरुपरि स्थापयित्वेति तृतीयमित्यासनत्रयम् । प्राणायामेतिकर्तव्यतामाह । स्मरणपूर्वकमिति। अयमर्थः। ह्रस्वोच्चारणकालो मात्रा षोडशमात्राकालं रेचकं कुर्यात्। द्वात्रिंशन्मात्राकालं पूरकंकुर्यात्। तद्विगुणं चतुःषष्टिमात्रापरिमितकालं कुम्भकं कुर्यात्। प्राणायामसमये सुषुम्नानाड्यां स्थितं वायुं विष्णुं च संस्मरेत् ॥ १४७-१४९ ॥

मूलाधारं समारभ्य त्वामूर्धानमृजुस्थिता ।
मध्ये सुषुम्ना विज्ञेया वज्रिकाऽऽर्या प्रकाशिनी ॥
वैद्युता ब्रह्मनाडीति सैव पंचप्रभेदिनी ॥ १५० ॥
पृष्ठवामाग्रदक्षान्तर्भेदास्ते च क्रमेण तु ।
हरिन्नीलः सितः पिङ्गो लोहिताश्चात्र केशवः ॥
प्रद्युम्नादिस्वरूपेण ध्येयः सिद्धिमभीप्सता ॥ १५१ ॥

ध्यानं विवक्षुः सुषुम्नानाडीः तत्स्थविष्णुरूपाणि चाह । मूलाधारमिति मूलाधारात् शिरःपर्यन्तं ऋजुः अवक्रा सुषुम्नाख्या नाडी हृदयमध्ये विज्ञेया । सैव ब्रह्मनाडी । तस्याः पृष्ठभागे वज्रिका । वामभागे आर्या । अग्रभागे प्रकाशिनी । दक्षिणभागे वैद्युता । तासु पञ्चसु स्थितो हरिदादिवर्णो हरिर्ध्येयः । मध्ये सुषुम्नायां नारायणो रक्तवर्णो ध्येयः तत्पश्चाद्भागे वज्रिकायां हरिद्वर्णः प्रद्युम्नो ध्येयः । तद्वामभागस्थितायां आर्यायां नीलवर्णोऽनिरुद्धो ध्येयः । तदग्रभागस्थितायां प्रकाशिन्यां श्वेतवर्णो वासुदेवो ध्येयः । तद्दक्षिणभागस्थवैद्युतायां पिङ्गलवर्णो सङ्कर्षणो ध्येय इति ॥ १५०-१५१ ॥

मूले च नाभौ हृदयेन्द्रियोनिभ्रूमध्यमूर्धद्विषडन्तकेषु ।
चतुःषडष्टद्विचतुर्द्विषट्कदलेषु पद्मेषु सितारुणेषु ॥
पञ्चात्मकोऽसौ भगवान् सदैव
ध्येयो हृदन्तान्यरुणानि तानि ॥ १५२ ॥

एवं पञ्चरूपस्य भगवतो ध्यानस्थानान्याह । मूले चेति । मूले मूलाधारे इन्द्रयोनिः तालुदेशः । सेन्द्रयोनिरित्यादिश्रुतेः । द्विषडन्तः । मस्तकादूर्ध्वं द्वादशाङ्गुलप्रदेशः । एतेषु चतुर्दलादिपद्मेषु सितारुणवर्णेषु पञ्चात्मको भगवान् सदैव ध्येयः । मूलनाभिहृदयस्थानानि पद्मानि अरुणानि । तालुभ्रूमध्यमूर्धस्थितानि सितानि । अत्रायं भावः । मूलाधारे चतुर्दलं पद्मं । नाभौ षड्दलं । हृदयेऽष्टदलं । एतान्यरुणानि । तालुदेशेऽष्टदलं । भ्रूमध्ये द्विदलम् । मूर्ध्नि षड्दलं । तेषु पद्मेषु स्थितं पञ्चरूपं विष्णुं ध्यायेत् ॥ १५२ ॥

त्रिकोणवह्नौ च षडस्रवायौ
द्विस्तावदस्ररविवृत्तशशिस्थवह्नौ ।
वृत्ते विधावपि विचिन्त्यमिदं दशार्ध-
रूपं सितं तदखिलं हृदयात्परस्थम् ॥ १५३ ॥

एवंविधपद्माधारभूतमण्डलान्याह ।। त्रिकोणेति । मूलाधारे त्रिकोणं वह्निमण्डलं तिष्ठति। नाभिदेशे षट्कोणं वायुमण्डलं। हृदये द्विस्तावदस्रं द्वादशकोणं रविमण्डलम् । भ्रूमध्ये त्रिकोणवह्निमण्डलं । एतन्मण्डलेषु पद्मेषु पञ्चरूपो भगवान् ध्येय इति ।। १५३ ।।

इडा च पिङ्गला चैव वज्रिका धारिणी तथा ।
सुषुम्नायाश्चतुर्दिक्षु वज्रिकाद्यासु तत्र च ।।
चतुर्मूर्तिः स भगवान् हृदये संव्यवस्थितः ।। १५४ ।।

नाड्यन्तरमाह । इडा चेति । इडादि चतुर्षु पूर्वोक्तासु च वज्रिकासु चतुमूर्तिः वासुदेवादिरूपो हृदयस्थो भगवान् ध्येयः ।। १५४ ।।

द्वासप्ततिसहस्राणि नाड्योऽन्यास्तु प्रधानतः ।
बृहतीसहस्रस्पर्शानामृचां वाच्योऽत्र केशवः ।। १५५ ।।
रूपाणां लक्षणं तेषां रहस्यत्वान्न कथ्यते ।
विष्णुना ब्रह्मणे प्रोक्तं ग्रन्थसङ्कोचतस्तथा ।। १५६ ।।

द्वासप्ततिनाड्यो प्रधानाः । अन्याः वज्रिकाद्यास्त्वप्रधाना इत्यर्थः । आसु ध्येयं वक्तुमाह । बृहतीति । बृहती नवाक्षरपदं बृहतीछन्दः तु ऋचां ये स्पर्शाः वर्णाः कादिमावसानाः पञ्चवर्गस्थाः तेषां ऋचां च वाच्यः । केशवो नानारूपो ध्येय इति ।। १५५-१५६ ।।

खण्डस्मृतिर्धारणा स्यादखण्डा ध्यानमुच्यते ।
अप्रयत्नात्समाधिश्च दर्शनं चिरया तया ।। १५७ ।।
अथवा सततं शास्त्रविमर्शेन भविष्यति ।
परमस्नेहसंयुक्तयथार्थज्ञानतो भवेत् ।।
सा भक्तिरिति विज्ञेया साधनं भोगमोक्षयोः ।। १५८ ।।

खण्डस्मृतिरिति । एकैकावयवा स्मृतिः खण्डस्मृतिः धारणेत्युच्यते । अखण्डा समग्रावयवस्मृतिः समाधिः ध्यानमित्युच्यते। अप्रयत्ना प्रयत्नं विना समग्रावयवस्थितिः । चिरकालमनुष्ठितया समाधिरूपया स्मृत्या हरेर्दर्शनम् । अपरोक्षज्ञानं भवेदिति भावः । पक्षान्तरमाह । अथवेति । सततं शास्त्रविमर्शेन निरन्तरशास्त्रार्थविचारेण वा दर्शनं अपरोक्षज्ञानं विष्णोर्भविष्यति । भक्तिस्वरूपमाह । परमेति ।। १५७-१५८ ।।

मुख्यमेषैव नान्यत्स्यात्सर्वं व्यर्थं तया विना ।
सैकाऽप्यभीष्टफलदा मोक्षो दर्शनयुक्तया ॥ १५९ ॥

एका साधनान्तरनिरपेक्षा । तथा च गीतासु भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपेति । दर्शनं ज्ञानं ॥ १५९ ॥

दर्शनं च तया हीनं व्यर्थमन्यत्किमुच्यते ।
योग्यं तु दर्शनं नैव तया हीनं भविष्यति ॥ १६० ॥

तया भक्त्या हीनं व्यर्थं । अन्यत्कर्मादि किमुच्यते । योग्यं मुक्तिसाधनं दर्शनमपरोक्षज्ञानमपि । भक्त्या हीनं न भविष्यति । न भवेदित्यर्थः ॥ १६० ॥

आनन्दचित्सदितिपूर्वगुणैः समस्तैः
मत्यादिभिर्विधिपरैर्भगवान् क्रमेण ।
ध्यातोऽधिकैरधिगुणोऽधिकमेव सौख्यं
मुक्तौ ददाति सततं परमस्वरूपः ॥ १६१ ॥

ध्याने तारतम्यमाह । आनन्देति । अधिकैरुत्तमगुणैः ध्यातः ॥ १६१ ॥

निर्दोषाखिलसम्पूर्णगुणेन हरिणा स्वयम् ।
ब्रह्मणे कथितात्तन्त्रसारादुद्धृत्य सादरम् ॥
आनन्दतीर्थमुनिना कृतो ग्रन्थोऽयमञ्जसा ॥ १६२ ॥
ग्रन्थोऽयं पाठमात्रेण सकलाभीष्टसिद्धिदः ।
किमु ज्ञानादनुष्ठानादुभयस्मात्पुनः किमु ॥ १६३ ॥

ग्रन्थ इति । पाठमात्रेण अर्थानुसन्धानरहितस्यापि । उभयस्मात् । ज्ञानानुष्ठानाभ्यां ॥ १६३ ॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ १६४ ॥

स्वकृतग्रन्थस्यापि मूलत्वेन प्रामाण्यं सूचयन् भक्तान् प्रति बळित्थेत्यादि श्रुतिसिद्धमात्मस्वरूपमाह । यस्येति । केशवे विषये । तत्प्रतिपादक इत्यर्थः ॥ १६४ ॥

अशेषदोषोज्झितपूर्णसद्गुणं सदा विशेषावगतोरुरूपम् ।
नमामि नारायणमप्रतीपं सदा प्रियेभ्यः प्रियमादरेण ।। १६५ ।।

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते
श्रीमत्तन्त्रसारसङ्ग्रहे चतुर्थोऽध्यायः ।। ४ ।।

केवलस्वस्वरूपकथनेनैव ग्रन्थो न समापनीय इति शिष्यान् उपदिशन् स्वनिरुपाधिकेष्टभगवन्नतिरूपं मङ्गलं आचरति । अशेषेति । आदरेण नमामीत्यन्वयः । विशेषापगतोरुरूपमिति । उरुरूपो बहुरूपः । तथा च अभेदे भेदकार्यकारिणा विशेषेण अपगतबहुभेदवानित्यर्थः । विशेषेण तरतमभावेन अपगतानि शून्यानि रूपाणि यस्येति वा विग्रहः । तथा च सर्वाण्यपि रूपाणि समानानि इति भाव इत्यशेषमतिमङ्गलम् ।। १६५ ।।

श्रीमध्वमाधवप्रीत्यै गुरूणां सदनुग्रहात् ।
व्याख्यानं तन्त्रसारस्य यथामति मयारचि ।। १ ।।
श्रीमदानन्दतीर्थोक्ताः क्व गिरो देवदुर्विदाः ।
क्वाहं मन्दमतिः कृष्णानुग्रहः साधयेन्न किम् ।। २ ।।

इति श्रीमध्वमाधवानुग्रहैकसहायवेदवेद्यशिष्यविरचिते
श्रीमत्तन्त्रसारसङ्ग्रहव्याख्याने तन्त्रसारविवृतौ
चतुर्थोऽध्यायः समाप्तः ।। ४ ।।



श्रीमद्विश्वसुमान्यतीर्थकरतः सम्प्राप्ततुर्याश्रमान्
श्रीमद्विठ्ठलराघवाङ्घ्रिकमलद्वन्द्वातपत्राश्रितान् ।
विद्यामान्ययतीश्वरस्य मुखतः सम्प्राप्तविद्याचणान्
विद्यापीठकुलेश्वरान् गुरुवरान् विश्वेशतीर्थान्नुमः ॥